Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

Indian Civilisation Series

*Founder-Editor* : **The Late Prof. V. S. Agrawala**

No. XXVII

# SUBHAGODAYA-STUTI OF ŚRĪGAUḌAPĀDĀCHĀRYA

**with Bhāvabodhinī Commentary of Śrī Paripūrṇa-Prakāśānanda Bhāratī Mahāsvāmī**

**श्रीगौडपादाचार्य-विरचिता सुभगोदयस्तुतिः**

**श्रीपरिपूर्णप्रकाशानन्दभारतीकृत-भावबोधिनीटीकासहिता**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## The Indian Civilisation Series

*Editor* : Dr. P. K. AGRAWALA

I. Masterpieces of Mathura Sculpture By *V.S. Agrawala*
II. The Vyāla Figures on the Medieval Temples of India By *M. A. Dhaky*
III. Pūrṇa Kalaśa or the Vase of Plenty By *P.K. Agrawala*
IV. Bṛihatkathāślokasaṁgraha–A Study By *V.S. Agrawala*
V. Evolution of the Hindu Temple and other Essays By *V.S. Agrawala*
VI. Mathura Railing Pillars By *P.K. Agrawala*
VII. Ancient Indian Folk Cults By *V.S. Agrawala*
VIII. Gupta Temple Architecture By *P.K. Agrawala*
IX. The Astral Divinities of Nepal By *P. Pal & D.C. Bhattacharyya*
XI. Early Indian Bronzes By *P.K. Agrawala*
XII. Temples of Tripura By *Adris Banerji*
XIII. India As Told by the Muslims By *Ram Kumar Chaube*
XIV. India as Described by Manu By *V.S. Agrawala*
XV. Archaeological History of S. E. Rajasthan By *Adris Banerji*
XVI. Śrīvatsa—The Babe of Goddess Śrī By *P.K. Agrawala*
XVII. Burial Practices in Ancient India By *Purushottam Singh*
XVIII. Gangetic Valley Terracotta Art By *P. L. Gupta*
XIX. Museum Studies By *V.S. Agrawala*
XX. Goddess Vināyakī—the Female Gaṇeśa By *P.K. Agrawala*
XXI. Aesthetic Principles of Indian Art By *P.K. Agrawala*
XXII. On the Ṣaḍaṅga Canons of Painting By *P.K. Agrawala*
XXIII. Vedic Lectures By *V.S. Agrawala*
XXIV. India—A Nation By *V.S. Agrawala*
XXV. Vāmana Purāṇa—A Study By *V.S. Agrawala*
XXVI. Hymn of Creation By *V.S. Agrawala*
XXVII. Subhagodaya-Stuti of Gauḍapādāchārya
XXVIII. Varanasi Seals and Sealings By *V.S. Agrawala*

*Forthcoming*

X. Superstructural Forms of Indian Temple By *M.A. Dhaky*

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# SUBHAGODAYASTUTI OF ŚRĪGAUḌAPĀDĀCHĀRYA

**with Bhāvabodhinī Commentary of Śrī Paripūrṇa-Prakāśānanda Bhāratī Mahāsvāmī**

EDITED BY

PRITHVI K. AGRAWALA
M. A., Ph. D.

RAMA ADHAR PATHAK
M. A., Ph. D.

Department of Ancient Indian History, Culture & Archaeology
BANARAS HINDU UNIVERSITY

1984

PRITHIVI PRAKASHAN
VARANASI - 221005 [INDIA]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

*Published by* :

© **Prithivi Prakashan**

B 1/54, Amethi Kothi, Nagwa,

VARANASI - 221005 [India].

First Edition : 1984

*As*

**INDIAN CIVILISATION SERIES** No. XXVII

*Editor* : Dr. P. K. AGRAWALA

*Printed at* :

**Ratna Printing Works**

B 21/42 A, Kamachha,

VARANASI - 221001.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# सुभगोदयस्तुतिविषयसूचिका


१. श्रीदेवीनमस्कारात्मकमङ्गलाचरणम् ।

२. योगिनः श्रीदेवीदर्शनप्रकारनिरूपणम् ।

३. समयाचारवतः योगिनः कृत्यनिरूपणम् ।

४. योगिशरीरे अमृतस्नपननिरूपणम् ।

५. तत्त्वान्तर्गता वा न वा कुण्डलिनीति शङ्कोद्गमे समाधानम् ।

६. कुण्डलिन्याः कुमार्यादिदशानिरूपणम् ।

७. देवीविहारस्थाननिरूपणम् ।

८. देवीवासगृहनिरूपणम् ।

९. उक्तमयूखानां खण्डविभजनम्; तेषां कालसम्बन्धसद्भावात्, तदतीतत्वं देव्याः निरूपणम् ।

१०. श्रीचक्रस्य बिन्द्वादिसप्तकस्य, मूलाधारादिसप्तकभावना-निरूपणम् ।

११. शिवशक्तिचक्रैक्यनिरूपणम् ।

१२. पूर्वसूचितसमयिचक्रैक्यनिरूपणम् ।

१३. चरण-षडब्जयोर्मेलनमुक्त्वा समयिनां चतुर्धैक्यकथनम् ।

१४. समयिनां मणिपूरचक्रे देवीसाक्षात्कारकथनद्वारा चतुर्धैक्य-कथनम् ।

१५. समयिनामत्रैव षड्धैक्यपरिणामभूत-सगुणदेवीरूपवर्णनम् इत्यैक्यनिरूपणम् ।

१६. उक्तदशभुजस्थपदार्थनिरूपणम् ।

१७. श्रीचक्रनिष्पत्तिनिरूपणम् ।

१८. एतद्(श्रीचक्र)वरियवस्याप्रतिपादकतन्त्रप्रशंसा ।

१९. पञ्चदशीमन्त्रोद्धारः ।

२०. मन्त्रखण्डत्रयं तेजस्त्रयमिति, तत्र मातृकालयं चेति निरूपणम् ।

२१. मातृकाप्रत्याहारकथनम् ।


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२२ मन्त्रस्य ऋषि-सपर्या-निरूपणम् ।

२३. त्रिखण्ड-मन्त्र-सरघा-षडब्जानामन्योन्यसंबन्धनिरूपणम् ।

२४. खण्डत्रयस्य स्वान्तलयनिरूपणपूर्वकं षोडशदलादित्रि-चक्रेषु एव मातृकालयनिरूपणम् ।

२५. उक्तषोडशदलादिशिवचक्रत्रयपूरकमिभदलं शांभवमिति शिव-शक्ति-चक्र-चतुष्टययोरभेदमिति निरूप्य नित्यास्वरूप-कथनम् ।

२६. षोडशीशशिकलालयम् अयम्-अक्-प्रत्याहारविवरणं च ।

२७. क्षकारातिशयस्य मणिपूरे समयिपूजाविशेषस्य च निरूपणम् ।

२८. चक्रेषु मणिपूरं द्वितीयमिति केषांचित्पक्षं, तृतीयमिति समयिपक्षं च निरूप्य, अनाहते वायूत्पत्तिनिरूपणम् ।

२९. अनाहतस्य संवित्कलत्वकथनं तदुपर्याकाश-सदाशिव-निरूपणं च ।

३०. विशुद्धचक्रे देवीपूजायाः सहस्रारे नित्याकलायाश्च विवरणम् ।

३१. समयिनां शुक्लपक्षपूजाकारणं ब्रह्मग्रन्थ्यादित्रयविवरणं च ।

३२. समयिनाम् अमावस्यापूजाभावे हेतुनिरूपणम् ।

३३. अमायाः, आज्ञाचक्रस्थचन्द्रबिम्बस्य च, स्वरूपनिरूपणम् ।

३४. पूर्वश्लोकोक्तज्योतिःकारणनिरूपणं निरूप्य श्रीचक्र-सरघा-बैन्दवकथनम् ।

३५. कुण्डलिन्याः आज्ञाचक्रात् सहस्रारचक्रगमनवर्णनम् ।

३६. परमतनिरूपणम् ।

३७. चतुर्धैक्यकलनानन्तरं, त्रिखण्डभावनायां त्रिधैक्य-निरूपणम् । इति मन्त्रचक्रैक्यनिरूपणम् ।

३८. क्रियापञ्चकसमामिति तडिद्रूपामिति च श्रीदेवीनिरूपणम् ।

३९. कौलादिपक्षाणां मुनेश्च स्वरूपनिरूपणम् । इत्यैक्य-निरूपणम् ।

४०. प्रस्तारत्रयप्रकृतिनिरूपणम् ।

४१. उक्तप्रस्तारत्रयविवरणम् । इति प्रस्तारत्रयनिरूपणम् ।

४२. कौल-वाम-मतनिरूपणम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



४३. कौलपूजाविवरणम् ।
४४. कौलदेवतानिरूपणम् ।
४५. उक्तकौलमतगन्धोऽपि समयिनां नास्तीति निरूपणम् ।
४६. चक्रोत्पत्तिकथनम् ।
४७. उक्तार्थस्य भङ्ग्यन्तरोत्पत्तिकथनम् ।
४८. मूलाधारद्वितयानन्तरोत्पत्तिकथनम् ।
४९. कौल-समयि-भेदनिरूपणम् ।
५०. षडब्जानीकस्य कालजनकत्वनिरूपणम् ।
५१. उपासनाफलनिरूपणम् ।
५२. तत्सिद्धौ (उपासनासिद्धौ) गुरुकृपायाः करणत्वनिरूपणम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अनुक्रमणिका


| | पृष्ठाङ्कम् |
|---|---|
| १. सुभगोदयविषयसूचिका | ख-ङ |
| २. सुभगोदयस्तुतिः भावबोधिनीसहिता | १-३५ |
| ३. परिपूर्णप्रकाशानन्दभारतीकृतः प्रस्तारभास्करः | ३६-४२ |
| ४. टीकाकर्त्तुः संक्षिप्तचरितम् | ४३ |
| ५. पाठभेदाः | ४४-४६ |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीः

# श्रीगौडपादाचार्यविरचिता सुभगोदयस्तुतिः

श्रीपरिपूर्णप्रकाशानन्दभारतीमहास्वामिविरचित-भावबोधिनी-
टीकासहिता

**भवानि त्वां वन्दे भवमहिषि सच्चित्सुखवपुः-**
**पराकारां देवीममृतलहरीमैन्दवकलाम् ।**
**महाकालातीतां कलितसरणीकल्पिततनुं[1]**
**सुधासिन्धोरन्तर्वसतिमनिशं वासरमयीम् ॥१॥**

पाठान्तरम्—(१) कलितसरणिं कल्पिततनुं ।

टीकाकरणप्रतिज्ञा—

या योगिमात्रप्रत्यक्षा यत्र संस्तूयते परा ।
तन्नुतेः क्रियतेऽस्माभिः[1] सनत्या भावबोधिनी ॥

भावबोधिनी-टीका—

श्रीशङ्करभगवत्पादपरमगुरवः श्रीगौडपादाचार्याः योगिहृदयंगम-कुण्डलिन्युपासनया श्रीदेवीतादात्म्याप्तिरूपमोक्षफलविधायिनीं सुभगोदयस्तुतिं चिकीर्षवः प्रथमं श्रीदेवीनमस्काररूपं कुर्वन्ति मङ्गलम् । "भवानि ! त्वां वन्दे" इति । हे भवानि = हे भवमहिषि ! त्वां वन्दे । कथंभूताम् ? सच्चित्सुखवपुःपराकाराम् = सच्चिदानन्दवपुष्ट्वेन परः उत्कृष्टः आकारः यस्याः तादृशीम् । देवीम् = स्वयंप्रकाशमानाम् । अमृतलहरीम् । ऐन्दवक-

1. अस्माभिः = श्रीपरिपूर्णप्रकाशानन्दभारतीमहास्वामिभिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लाम् = श्रीचक्रान्तर्गतबिन्दुसम्बन्धि **चन्द्रकला** (नित्याकला) रूपाम् । महाकालातीताम् = "हरः कालकालो गुणी **सर्वविद्यः** सर्ववेद्यः" इति श्वेताश्वतरोपनिषन्निरूपितमहाकालः नाम परमात्मा एव, तमत्यन्तम् इता प्राप्ता, स्वरूपसम्बन्धेन इति भावः, तादृशीम्। कलितसरणीकल्पिततनुम् = कलितया "तदैक्षत बहु स्याम्" इत्यादिश्रुत्युदितया सरण्या कल्पिता तनुः शरीरं यस्याः ताम् । अनिशम् । सुधासिन्धोरन्तर्वसतिम् = सुधासिन्धुमध्यस्थानम् एव वसतिः (वासस्थानम्) यस्याः तादृशीम् । सुधासिन्धोरन्तर्वसतिमित्यत्र अलुक्समासः "कण्ठेकालः" इतिवत् । वासरमयीम् = वासरपदेन व्यावहारिककालः लक्ष्यते, तद्रूपां च इति भावः । एतादृशीं त्वां वन्दे इति पूर्वेण अन्वयः ॥१॥

अथ योगिनः श्रीदेवीदर्शनप्रकारनिरूपणम्—

**मनस्तत्त्वं जित्वा नयनमथ नासाग्रघटितं**
**[1]पुनर्व्यावृत्ताक्षः स्वयमपि यदा पश्यति पराम् ।**
**तदानीमेवास्य स्फुरति बहिरन्तर्भगवती**
**परानन्दाकारा परशिवपरा काचिदपरा ॥२॥**

पाठा० - (१) पुनर्व्यावृत्ताक्षिद्वयमपि ।

मनस्तत्त्वं जित्वा = "योगश्चित्तवृत्तिनिरोधः" [पातञ्जलयोगसूत्रम्] इत्याद्युक्तविधिना मनः जित्वा । अथ नयनं नासाग्रघटितं कृत्वा । व्यावृत्ताक्षः पुनः = प्रपञ्चदृष्टेः व्यावृत्तम् अक्षिद्वयं येन तादृशः सन् । स्वयम् । परां देवीम् अपि यदा पश्यति योगी तदानीम् एव । अस्य । भगवती । परशिवपरा = परमात्मैकाधारवती । काचित् = अनिर्वाच्या । अपरा = अद्वितीया । परानन्दाकारा = परानन्द-स्वरूपिणी । बहिः अन्तः च स्फुरति ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ समयाचारवतः योगिनः कृत्यनिरूपणम्—

**मनोमार्गं जित्वा मरुत इह नाडीगणजुषो**
**निरुध्यार्कं सेन्दुं दहनमपि संज्वाल्य शिखया ।**
**सुषुम्नां संयोज्य श्लथयति च षड्ग्रन्थिशशिनं**
**तवाज्ञाचक्रस्थं विलयति[1] महायोगिसमयी ॥३॥**

पाठा०—(१) श्लथयति, विलसति ।

हे देवि ! महायोगिसमयी = समयाचारवान् योगी । मनोमार्गं नाडीगणजुषः मरुतः [= वायून् च] जित्वा । इह [नाडीगणान्तर्गते इडापिङ्गलयोः] । सेन्दुम् अर्कम्; निरुध्य = स्वस्वस्थाने निरुद्धं कृत्वा । दहनम् = मूलाधारस्थिताग्निम् । संज्वाल्य अपि । शिखया = तत्संज्वलिताग्नेः शिखया । सुषुम्नाम् = सुषुम्नानाडीम् । संयोज्य तत्संयोजनक्रियाविशेषेण । हे देवि ! तव = त्वत्संबन्धिनम् । आज्ञाचक्रस्थम् । षड्ग्रन्थिशशिनम् = मूलाधारादिषट्चक्रान्तस्थितचन्द्रमण्डलम् । श्लथयति । विलयति च = द्रावयति च ॥३॥

अथ योगिशरीरे अमृतस्नपननिरूपणम्—

**यदा तौ चन्द्रार्कौ निजसदनसंरोधनवशा-**
**[1]दशक्तौ पीयूषस्रवणहरणे सा च भुजगी ।**
**प्रवृद्धा क्षुत्क्रुद्धा दशति शशिनं बैन्दवगतं**
**सुधाधारासारैः स्नपयसि तनुं बैन्दवकले ॥४॥**

पाठा० – (१) दशक्ता ।

बैन्दवकले = बिन्दुस्थानगतनित्याकलारूपिणि ! हे भगवति ! तौ चन्द्रार्कौ । निजसदनसंरोधनवशात् । पीयूषस्रवणहरणे = स्रवत्पीयूषाहरणे । यदा । अशक्तौ = शक्तिहीनौ भवतः । [तदा] सा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भुजगी च = कुण्डलिनी। क्षुत्क्रुद्धा = क्षुधा पीयूषफलाभावात् संजातक्षुधा क्रुद्धा। प्रवृद्धा = वृद्धिं प्राप्ता। बैन्दवगतं शशिनं दशति। [तत्कारणेन प्रवृत्तेः] सुधाधाराऽऽसारैः = अमृतधाराणाम् आसारैः तनुम् = योगिशरीरम्। लक्षणया द्विसप्तति[७२]-सहस्र-नाडीनि। स्नपयसि, लक्षणया पूरयसि। हे देवि! त्वं कुण्डलिनीरूपा सती पूरयसि इति भावः ॥४॥

अथ तत्त्वान्तर्गता वा न वा कुण्डलिनीति शङ्कोद्गमे समाधानम्—

**पृथिव्यापस्तेजः पवनगगने तत्प्रकृतयः**
**स्थितास्त[१]न्मात्रास्ता विषयदशकं मानसमिति।**
**[२]ततो माया विद्या तदनु च महेशः शिव इतः**
**परं तत्त्वातीतं मिलितवपुरिन्दोः परकला ॥५॥**

पाठा०—(१) तन्मात्राऽऽप्ताः। (२) तथा।

पृथिव्यापस्तेजः पवनगने = पृथिव्यादिपञ्चमहाभूतानि। तत्प्रकृतयः = तत्पञ्चमहाभूतप्रकृतयः। तन्मात्रास्ताः [पाठान्तरम्—तन्मात्राप्ताः] = तन्मात्रसंज्ञया उपलब्धाः। स्थिताः = उपस्थिताः मिलित्वा दश इति संख्येयाः। विषयदशकम्। मानसम् इति। ततः माया। विद्या। तदनु च महेशः = जीवस्थानीयः। शिवः = "हिरण्यगर्भस्समवर्तताग्रे" इति श्रुत्युक्तहिरण्यगर्भः [एतानि आहत्य पञ्चविंशति तत्त्वानि]। इतः परं तत्त्वातीतम् [अस्ति वस्तु किञ्चित्, किं तद् इत्याकाङ्क्षायाम्] इन्दोः = बैन्दवेन्दुसम्बन्धिनी। परकला = नित्याकला। मिलितवपुः = इन्दुना मिलितवपुः अस्ति न पार्थक्येन इति भावः। सा एषा एव स्तुत्या देवी कुण्डलिनी ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कुण्डलिनीदशानिरूपणम्—

**कुमारी यन्मन्द्रं ध्वनति च ततो योषिदपरा**
**कुलं त्यक्त्वा [1]रौति स्फुटति च [2]महाकालभुजगी ।**
**ततः पातिव्रत्यं भजति दहराकाशकमले**
**सुखासीना योषा भवसि भवसीत्काररसिका ।।६।।**

पाठा०—(१) काचित् । (२) महानीलभुजगो; महाकालपतगी ।

योगी यदा कुण्डलिन्युत्थापनं कुरुते तदा सा कुण्डलिनी मन्द्रध्वनिं करोति, तदानीं सा कुमारीपदवाच्या भवति । ततः । कुलम् = कुलकुण्डम् । मूलाधारस्थानम् । त्यक्त्वा = हित्वा, स्वाधिष्ठानादिचक्रसंचारिणी यदा तदा । रौति = रोरवणं कुरुते, तदा सा योषिद् वाच्या । स्फुटति च = स्पष्टा च भवति । ततः परं महाकाशपद्मे यदा सुखासीना, स्फुटतरा । भवसीत्काररसिका सती = महाकामेश्वरसीत्कारेषु प्रीततरा भूत्वा, पातिव्रत्यं भजते । तदा, महाकालभुजगी = कुण्डलिनी इति प्रसिद्धा । तथा च श्रुतिः—"यत्कुमारी मन्द्रयते । यद्योषिद्यत्पतिव्रता" इति ।।६।।

अथ देवीविहारस्थाननिरूपणम्—

**त्रिकोणं ते कौलाः कुलगृहमिति प्राहुरपरे**
**चतुष्कोणं प्राहुः समयिन इमे बैन्दवमिति ।**
**[1]सुधासिन्धौ तस्मिन् सुरमणिगृहे सूर्यशशिनो-**
**रगम्ये रश्मीनां समयसहिते त्वं [2]विहरसे ।।७।।**

पाठान्तराणि—( १ ) सुधासिन्धोस्तस्मिन् । ( २ ) विहरसि ।

श्रीपदवाच्यसर्वसृष्टिचक्रप्रतीकभूतश्रीचक्रयन्त्रे यत्त्रिकोणं तत् कुलगृहम् इति, मूलस्थानप्रतीकम् इति कौलाः भावयन्ति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपरे पुनः समयिनः । चतुष्कोणं = चतुरस्रं [ = सुन्दरम् ] । बैन्दवम् इति, चतुष्कोणबिन्द्वोः अंशसाम्यत्वात्; बैन्दवम्; बिन्दुस्थानम् एव मूलस्थान-प्रतीकम् इति च भावयन्ति । चतुरस्र-पदस्य सुन्दरार्थे प्रयोगः, "बभूव तस्याश्चतुरस्रशोभि, वपुर्विभक्तं नवयौवनेन" [ कुमारसम्भवम् १।३७ ] इति । हे देवि ! त्वम् । तस्मिन् सुधासिन्धौ । सुरमणिगृहे = देवरत्नगृहे, चिन्तामणिगृहे इति भावः, चिन्तामणिः नाम देवीध्यानरूपम् अत्युत्तमरत्नं तन्मयगृहे इति तात्पर्यम् । तस्य चिन्तामणिगृहस्य समयसहिते इति विशेषणम्; अत्र समयः नाम शिवशक्त्यैक्यस्य योगसमयः [ कालः ], तादृशसमयविशिष्टगृहे इति भावः । यतः इदं गृहं सगुणप्रपञ्चप्रवृत्तिहेतुकसूर्यशिशिररश्मीनाम् अगम्यत्वविशिष्टम् । तादृशरहस्यगृहे त्वं विहरसि इति देवीस्तुतिः ॥७॥

अथ देवीवासगृहनिरूपणम्—

**त्रिखण्डं ते चक्रं शुचिरविशशाङ्कात्मकतया**
**मयूखैः [१]षट्त्रिंशद्दशयुततया खण्डकलितैः ।**
**पृथिव्यादौ तत्त्वे पृथगुदितवद्भिः परिवृतं**
**[२]भवेन्मूलाधारात्प्रभृति तव षट्चक्रसदनम् ॥८॥**

पाठान्तराणि—(१) षट्त्रिंशत्त्रिशतयुतमाखण्ड०; षट्त्रिंशच्छतयुततया ।
(२) भवेन्मूलाधारप्रभृति ।

हे देवि ! तव सृष्टिरूपं चक्रम् अग्नि-सूर्य-चन्द्रात्मकत्वेन त्रिधा विभक्तम् । अतः तेषाम् अग्न्यादीनां मयूखाः सर्वे मिलिताः, ये षष्ट्यधिकत्रिशतसंख्याकाः ते पुनः, पृथिव्यादिमनोन्तषट्-तत्त्वेषु विभक्ताः सन्तः ब्रह्माण्डप्रतीकभूतपिण्डाण्डे मूलाधारादिषट्-चक्ररूपसदने प्रतिभान्ति । तादृशं तव वासगृहम् इति देवीवासगृह-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निरूपणम् । अत्र उक्तमयूखानां तत्त्वेषु विभजनं, श्रीमदाचार्यैः सौन्दर्यलहर्यां "क्षितौ षट् पञ्चाशद्" इत्यादिश्लोके निरूपितम् । किं च अत्र मयूखसंख्याबोधकस्य "षट्त्रिंशद्दश-"पदस्य षट्त्रिंशत्संख्याक-दशसंख्या इति अर्थः वक्तव्यः—तदा, दशगुणिता षट्त्रिंशद् [३६०] इति भवति ॥८॥

अथ उक्तमयूखानां खण्डविभजनं तेषां कालसम्बन्ध-सद्भावात्, तदतीतत्वं देव्याः निरूपणम्—

**शतं चाष्टौ वह्नेः शतमपि कलाः षोडश रवेः**
**शतं षट्[1] च त्रिंशत् सितमयमयूखाश्चरणजाः ।**
**य एते षष्टिश्च त्रिशतमभवंस्त्वच्चरणजा[2]**
**[3]महाकौलैस्तस्मान्न हि तव शिवे कालकलना ॥९॥**

पाठान्तराणि—(१) षट्त्रिंशद्वै; षट्त्रिंशद्वै सितमयि ।
(२) चरणगा । (३) महाकालस्तस्मात् ।

तेषां मयूखानां मध्ये अष्टोत्तरशतसंख्याकाः वह्निसम्बन्धिनः; तथा रविसम्बन्धिनः षोडशोत्तरशतसंख्याकाः; षट्त्रिंशदुत्तरशतसंख्याकाः तु सोमसम्बन्धिनः इति निरूप्य; ते सितमयाः = सितविकाराः, सितजन्याः इति भावः । सितं नाम निर्मलवस्तु-परमात्मेति यावत् । ते; कालात्मकाः तव चरणजाः इति निरूप्य देव्याः तावत् तादृशकालकलनाव्यापारासाध्यत्वेन [तदसाध्यत्वं यथा—तेषां मयूखानां कालत्वकलनात् । महाकालपदेन, तद्भिन्नः महाकालः अस्ति इति निरूप्य । तस्मात् = तस्मात् कारणाद् (यत्कारणेन महाकालरूपात्परमात्मनः तव अभेदत्वं वक्ष्यमाणरीत्या सिध्यति तस्मात्कारणाद् इत्यर्थः) देव्याः कालकलनाव्यापारासाध्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वम् उपपन्नम्; तेन] हे शिवे ! तादृशकालकलना तव न अस्ति इति; कालातीतत्वं देव्याः निरूपितम् । आचार्यैः अपि तथा— "मयूखास्तेषामप्युपरि तव पादाम्बुजयुगम्" इति सौन्दर्यलहर्यां निरूपितम् । अत्र "महाकौलैः"इतिपदस्य "महाकालः" इति पाठान्तरम् । तदनुरुद्धा इयं टीका । किं च, "त्वच्चरणजाः" इति अत्र किञ्चिद् वक्तव्यम् । देव्याः चरणौ नाम-बिन्दुरूपस्य[1] अस्तिपदवाच्यस्य परमात्मनः त्रिज्यास्थानीयमायाविर्भावेन समवृत्तत्वे सिद्धे तच्चरणभूत-नीचोच्चसंज्ञकपदयोः (केन्द्रच्युतिवशादुद्भूतयोः) संयोगात्समवृत्तस्य दीर्घवृत्तत्वसिद्धिः [त्रिनाभिचक्रत्वसिद्धिः] तत्स्मारकम् इदं "त्वच्चरणजाः" इति पदम् । श्रीमदाचार्यैः अपि उक्तं सौन्दर्यलहर्यां—"मयूखास्तेषामप्युपरि तव पादाम्बुजयुगम्" इति । किं भोः ! खेटगतिमार्गभूतदीर्घवृत्तीयनीचोच्चयोः, श्रीदेवीचरणयोः च कः सम्बन्धः ? इति आक्षेपस्य समाधानं खेटानां कषकं परितः भ्रमणं यया शक्त्या सम्पद्यते सा एव श्रीदेवीरूपा इति वदामः । तथा च श्रूयते—"त्रिनाभिचक्रमजरमनर्वं येनेमा विश्वा भुवनानि तस्थुः" इति । अस्य अयं भावः, श्रीदेवीरूपशक्तिं विना न उपपद्यते ग्रहाणां भ्रमणं, न तं विना त्रिनाभिचक्रप्रादुर्भावः, न विना तादृशचक्रं सर्वभुवनानां प्रस्थानं[2] सम्भवति । अतः भ्रमणहेतुभूता शक्तिः एव श्रीदेवी इति भाषणे न दोषः ॥९॥

---

1. बिन्दु = Point, तस्य लक्षणम्—A point is a position, without magnitude. Position = अस्तित्वम् (अस्ति भाति प्रियं इत्युक्तब्रह्मलक्षणत्रयान्तर्गत-अस्तिपदार्थमेव अस्तित्वम्) ॥

2. तस्थुः = प्रतस्थुः; प्रयाणमकुर्वन्तेति भावः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ श्रीचक्रस्थबिन्द्वादिसप्तकस्य मूलाधारादिसप्तकभावनानिरूपणम्—

**त्रिकोणं चाधारं [१]त्रिपुरतनु तेऽष्टारमनघे**
**[२]भवेत्स्वाधिष्ठानं पुनरपि दशारं मणिपुरम् ।**
**दशारं ते संवित्कमलमथ मन्वस्रकमुमे**
**विशुद्धं स्यादाज्ञा शिव इति ततो बैन्दवगृहम् ॥१०॥**

पाठान्तराणि—(१) त्रिभुवननुते; त्रिभुवननुतेष्वार० ।
(२) तव स्वाधिष्ठानं भगवति ।

हे त्रिपुरतनु ! "त्रिभुवननुते" इति पाठान्तरम् । तत्पक्षे, त्रिलोकस्तुते, हे अनघे ! हे देवि ! त्वत्प्रतीकश्रीचक्रस्थत्रिकोणं मूलाधारचक्रम् इति—अष्टारं स्वाधिष्ठानम् इति—द्वितीयदशारं मणिपुरम् इति—अन्तर्दशारं संविच्चक्रं नाम् हृदयम् इति—मन्वस्रं तु विशुद्धम् इति—आज्ञाचक्रं शिव[सदाशिव]कमलम् इति—ततः ऊर्ध्वं बैन्दवगृहम् इति [सहस्रारम् इति] योगिभिः उपास्यते ॥१०॥

अथ शिवशक्तिचक्रैक्यनिरूपणम्—

**त्रिकोणे ते वृत्तत्रितयमिभकोणे वसुदलं**
**कलाश्रं मिश्रारे भवति भुवनाश्रे [१]च भुवनम् ।**
**चतुश्चक्रं शैवं निवसति भगे[२] शाक्तिकमुमे**
**प्रधानैक्यं षोढा भवति च तयोः शक्तिशिवयोः ॥११॥**

पाठा०—(१) त्रिभुवनम् । (२) दशे शाक्तिकमुभे; भगे शाक्तकमुमे ।

शिवचक्राणि चत्वारि—वृत्तत्रयं, वसुदलं, षोडशदलं, भूपुरत्रयम् इति । एतेषां क्रमेण चतुर्विधशक्तिचक्रेषु, त्रिकोण-वसुकोण-दशारयुग्म [अन्तर्दशार-बहिर्दशार-रूपमिश्रार] - चतुर्दशारात्मकेषु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऐक्यं कथितम् । हे उमे ! इति संबुद्धिः । भगे = श्रीविषये [श्रीचक्रविषये] । शाक्तिकं = शक्तिचक्रैक्यम् एवं निरूपितम् । एवम् उक्त्वा प्रधानैक्यं षोढा समयिनाम् इति सूचितं च ॥११॥

अथ पूर्वसूचितसमयिचक्रैक्यनिरूपणम्—

**कलायां बिन्द्वैक्यं तदनु च तयोर्नादविभवे**
**तयोर्नादेनैक्यं तदनु च कलायामपि तयोः ।**
**तयोर्बिन्दावैक्यं त्रितयविभवैक्यं परशिवे**
**तदेवं[1] षोढैक्यं भवति हि सपर्या समयिनाम् ॥१२॥**

पाठान्तरम्—(१) तथैवं ।

समयिनां पुनः "अग्रबिन्दुपरिकल्पिताननाम्" इत्यादिना सपर्या सम्पद्यते हि । अतः तेषां कला-नाद-बिन्द्वाख्यवस्तूनि प्रधानानि त्रीणि; एतत्त्रयस्य अन्योन्यकलनया षड्विधैक्यं निरूपितम् । यथा, कलायां बिन्दुयोगः । नादे तावत् कलाबिन्द्वोः योगः । बिन्दुकलयोः नादेन योगः । तथैव कलायां बिन्दुकलयोः योगः । एवमेव बिन्दौ नादकलयोः ऐक्यम् । षष्ठं पुनः परशिवे कला-नादबिन्दूनाम् ऐक्यम् । एवं षड्धा समयिसपर्या निरूपिता । एवम् अन्योन्यकलनायां फलविशेषजननविषये अस्ति दृष्टान्तः । यथा "आज्ये मधूष्तं पीयूषं, मधुन्याज्यं विषं तथा" [ब्रह्म-सिद्धान्ते] इति । एवम् एव अत्र अपि इति ज्ञेयम् ॥१२॥

अथ चरणषडब्जयोः मेलनम् उक्त्वा समयिनां चतुर्थैक्यकथनम्—

**कला, नादो, बिन्दुः, क्रमश इह वर्णाश्च चरणं**
**षडब्जं चाधारप्रभृतिकममीषां च मिलनम् ।**
**[1]तदेवं षोढैक्यं भवति खलु येषां समयिनां**
**चतुर्थैक्यं तेषां भवति हि सपर्या समयिनाम् ॥१३॥**

पाठान्तरम्—(१) तथैवं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इह तावत् कला-नाद-बिन्दवः ध्वन्यंशाः, वर्णाः चरण-संज्ञकाः, आधार[मूलाधार]प्रभृति-षट्चक्राणि, षडब्जसंज्ञ-कानि । एतेषां परस्परमेलनं येषां समयिनां षोढा भवति, तेषाम् एव चतुर्थैक्यरूपसपर्या हि भवति; तेषां मूलाधारस्वाधिष्ठानयोः सपर्याभावात् ॥१३॥

अथ समयिनां मणिपूरचक्रे देवीसाक्षात्कारकथनद्वारा चतुर्थैक्य-कथनम्---

**तडिल्लेखामध्ये स्फुरति मणिपूरे भगवती**
**चतुर्थैक्यं तेषां भवति च चतुर्बाहुरुदिता ।**
**धनुर्बाणानिक्षूद्भवकुसुमजानङ्कुशवरं**
**तथा पाशं बिभ्रत्युदितरविबिम्बाकृतिरुचिः[१] ॥१४॥**

पाठान्तरम्---(१) रुचि ।

मणिपूरचक्रे एव भगवती विद्युल्लेखा इव भासते समयिनां योगिनाम् इत्यर्थः । अतः [मूलाधारस्वाधिष्ठानयोः सपर्याभावात्] तेषां चतुर्थैक्यम् । स्फुरति हि; देवी तावद् उद्यद्रविनिभा चतुर्बाहुभिः इक्षुधनुःपुष्पबाणपाशाङ्कुशवद्भिः भासमाना दृश्यते च ॥१४॥

अथ समयिनामत्रैव षड्धैक्यपरिणामभूतसगुणदेवीरूपवर्णनम्--

**भवत्यैक्यं षोढा भवति भगवत्याः समयिनां**
**मरुत्वत्कोदण्डद्युतिनियुतभासा समरुचिः ।**
**भवत्पाणिव्रातो दशविध इतीदं मणिपुरे**
**भवानि ! प्रत्यक्षं तव वपुरुपास्ते न हि परम् ॥१५॥**

इत्यैक्यनिरूपणम् ।

हे भगवति ! हे भवानि ! यदा समयिनां षड्धैक्यं तदा त्वं दशभुजा एव दृश्यसे । दशसहस्रसुरधनुष्कान्तितुलितकान्त्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शोभमाना मणिपुरे एव । यतः भवत्पाणिव्रातः शृङ्गारादिनव-रसरूपः । अत्र शृङ्गारादयः नव एव अपि शान्तस्य सगुणनिर्गुण-भेदेन द्विधा भिन्नत्वात् तेषां दशत्वसिद्धिः । किं च अत्र शान्तस्य ब्रह्मालम्बत्वेन । तस्य नादब्रह्मोपकरणत्वेन च । तन्नादजनकत्वाद् वीणायाः तद्ग्रहणं पाणिभ्याम् उक्त्वा । सम्पादिता दशसंख्या देवीभुजानाम् इति रहस्यम् । यः एवं तव वपुः प्रत्यक्षम् उपास्यते तस्य इतः परं श्रेयस्करं न अस्ति ॥१५॥ इत्यैक्यनिरूपणम् ॥

अथोक्तदशभुजस्थपदार्थनिरूपणम्——

**भवानि ! श्रीहस्तैर्वहसि फणिपाशं सृणिमथो**
**धनुः पौण्ड्रं पौष्पं शरमथ जपस्रक्शुकवरौ ॥**
**अथ द्वाभ्यां मुद्रामभयवरदानैकरसिकां[1]**
**क्वणद्वीणां द्वाभ्यां [2]त्वमुरसि कराभ्यां च बिभृषे ॥१६॥**

पाठा०-(१) रसिके । (२) उरसि च ।

हे भवानि ! त्वम् । त्वद्धस्तैः दशभिः नागपाशादीन् वहसि । तेषां विवृतिः पूर्वश्लोकानुबन्धेन द्रष्टव्या । यथा, "रागस्वरूपपाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला" इति उक्तेः करुणारसधर्मवद्रागस्य बन्धहेतुत्वात् पाशत्वं रौद्ररसधर्मवत्क्रोधस्य वशीकरणहेतुत्वाद् अङ्कुशत्वं यथा उपपद्यते तथा एव अवशिष्ट-धनुर्बाणादीनां रूपाणि उन्नेयानि शृङ्गारादिभिः इति सूचयामः ॥१६॥

अथ श्रीचक्रस्वरूपवर्णनम्——

**त्रिकोणैरष्टारं त्रिभिरपि दशारं समुदभूद्**
**दशारं भूगेहादपि च भुवनाश्रं समभवत् ।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**ततोऽभून्नागारं नृपतिदलमस्मात्त्रिवलयं**
**[1]चतुर्द्वाः प्राकारत्रितयमिदमेवाम्ब [2]शरणम् ॥१७॥**

पाठा०—(१) चतुर्धा। (२) चरणम्।

बिन्दोः त्रिकोणं——तैः त्रिकोणैः त्रिभिः अपि अन्तर्दशारं——तद्बहिः पुनः दशारं–तद्बहिः चतुर्दशारं–तदनन्तरम् अष्टदलपद्मं–तद्बहिः षोडशदलपद्मं–तद्बहिः वलयत्रयं–तद्बहिः भूपुरत्रयम् इति। हे अम्ब! ते गृहरूपं श्रीचक्रम् एव निरूपितम् ॥१७॥

अथ एतद्वरिवस्याप्रतिपादकतन्त्रप्रशंसा——

**चतुःषष्टिस्तन्त्राण्यपि [1]कुलमतं निन्दितमभूद्**
**यदेतन्मिश्राख्यं मतमपि भवेन्निन्दितमिह।**
**शुभाख्याः पञ्चैताः श्रुतिसरणिसिद्धाः प्रकृतयो**
**महाविद्यास्तासां भवति [2]परमार्थो भगवती ॥१८॥**

पाठा०—(१) कुलनुतं निन्दितमिदं तदेतत्। (२) परमार्था; परमार्थो भगवति।

कुलमतप्रतिपादकचतुष्षष्टितन्त्रसमूहः निन्द्यः एव मिश्राचारः अपि। हे भगवति। श्रुतिसिद्धशुभागमपञ्चकस्य पुनः (सनक-सनन्दन-सनत्कुमार-वसिष्ठ-शुक-नामकं संहितापञ्चकं पुनः) वेदमार्गानुरुद्धत्वाद् विप्राचरणीयाः तदुदिताचाराः न अन्ये इति॥ चतुष्षटितन्त्रनामानि सौन्दर्यलहरीव्याख्यायां लोल्ललक्ष्मीधरपण्डितकृतायां द्रष्टव्यानि ॥१८॥

अथ पञ्चदशीमन्त्रोद्धारः—

**स्मरो मारो मारः स्मर इति [1]परो मारमदन-**
**स्मरानङ्गाश्चे[2]ति स्मरमदनमाराः स्मर इति।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**त्रिखण्डः खण्डान्ते [३]कलितभुवनेश्यक्षरयुत-**
**श्चतुःपञ्चार्णास्ते त्रय इति च पञ्चाक्षरमनुः[४] ।।१९।।**

पाठान्तराणि—(१) स्मरो। (२) ०श्चैते। (३) कलितभुवने ते क इति यः। (४) ०मनोः। [पञ्चा० = पक्षा०]।

अत्र कूटत्रयस्य आन्त्यबीजत्रयं ''त्रिखण्डः खण्डान्ते कलितभुवनेश्यक्षरयुतः'' इति उक्त्वा क्रमेण, चतुः-पञ्च-त्रिवर्णाः उक्ताः। पञ्चदशाक्षराः इति, स्मर = विद्धि इति अर्थः। ते त्रयः खण्डाः पक्षाक्षरमनुः इति च स्मर इति पूर्वेण अन्वयः (उपासकं प्रति इयम् उक्तिः)। अत्र सर्वबीजानि स्मरपर्यायाणि एव अस्य स्वरोपासितत्वाद् इति ज्ञेयम् ।।१९।।

अथ मन्त्रखण्डत्रयं तेजस्त्रयमिति, तत्र मातृकालयं चेति निरूपणम्—

**त्रिखण्डे त्वन्मन्त्रे शशिसवितृवह्न्यात्मकतया**
**स्वराश्चन्द्रे लीनाः सवितरि कलाः कादय इह।**
**यकाराद्या वह्नावथ कषयुगं बैन्दवगृहे**
**निलीनं सादाख्ये शिवयुवति नित्यैन्दवकले ।।२०।।**

हे शिवयुवति ! त्वन्मन्त्रे त्रिखण्डात्मके क्रमेण, शशि-सवितृ-वह्न्यात्मकतेजस्त्रयतया भाविते पश्चात्तेषु खण्डेषु मातृकाः निलीनाः इति भाविताः। यथा, शशिनि, अकारादि-षोडशस्वराः चन्द्रकलारूपेण; एवं सवितरि कादयः चतुर्विंशतिसंख्याकाः आद्यन्तद्विद्विरूपेण (कं भं, छं बं इत्यादि द्विद्विरूपेण) निलीनाः; वह्नौ पुनः यकारादि-दशकम्। सादाख्ये नित्यैन्दवकले बैन्दवगृहे तु कषयुगं क्षकाररूपं निलीनम् इति। एवं मन्त्रमातृकयोः ऐक्यं निरूपितम् ।।२०।।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ मातृकाप्रत्याहारकथनम्—

**ककाराकाराभ्यां स्वरगणमवष्टभ्य निखिलं**
**कलाप्रत्याहारात् सकलमभवद् व्यञ्जनगणः ।**
**त्रिखण्डे स्यात्प्रत्याहरणमिदमन्वक्कषयुगं[1]**
**क्षकारश्चाकारोऽक्षरतनुतया चाक्षरमिति ॥२१॥**

पाठान्तर—(१) ०मञ्चत्कषयुगं ।

ककार-अकारयोः विलोमेन संयोगात् "अक्" इति प्रत्याहारः भवति, तत् षोडशस्वरसूचकः [अत्र अकाराद्याः षोडश अपि स्वराः अक् शब्दबहुवचनरूपेण (अचः इति रूपेण अचः स्वराः इति) स्मारिताः] तथा ककाराद्यः लकारः "कला" इति प्रत्याहारेण सर्वः अपि व्यञ्जनगणः (३५-व्यञ्जनरूपः गणः) स्मारितः । एवं खण्डद्वयं दर्शितम् । अथ तृतीयखण्डे तृतीयखण्डविषये । अन्वक् = अनुपदम् एव कषयोः योगेन क्षकारः जातः (क्ष इति प्रत्याहारः जातः इति भावः)—अयं आद्यक्षरेण अकारेण युतः सन् "अक्ष" इति रूपसिद्धौ सत्यां मातृकायाः अक्षरत्वाद् "अक्षरः" इति व्यवहारः जातः ॥ अत्र व्यञ्जनेषु, क-ष-युगग्रहणस्य कः हेतु इति विचारिते व्यञ्जनान्त्यत्रिवर्णेषु "ळ-" कारस्य लकारप्रकृतिकत्वात्, स-ह-वर्णयोः जगदतीत-प्रकृति-पुरुष-प्रतीकत्वात् च, तान् विहाय क-ष-योः योगरूपः क्षकारः प्रत्याहारः कृतः इति गम्यते ॥२॥

अथ मन्त्रस्य ऋषि-सपर्यानिरूपणम्—

**[1]विदेहेन्द्रापत्यं श्रुत इह ऋषिर्यस्य च मनो-**
**रयं चार्थः सम्यक् श्रुतिशिरसि तैत्तिर्यकऋचि ।**

पाठान्तरम्—(१) विदेहो नैर्ऋत्याः सुत इह ऋषिर्यः स च ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**ऋषिं हित्वा चास्या हृदयकमले नैतमृषिमि-**
**त्यृचाभ्युक्तः पूजाविधिरिह भवत्याः समयिनाम् ॥२२॥**

इह = मनु-चन्द्रादिद्वादशविद्यासु । यस्य मनोः = यद्विद्यायाः । विदेहेन्द्रापत्यं ऋषिः ("विदेहो नैर्ऋत्याः सुत इह ऋषिर्यः स च" इति पाठान्तरम्)एतत्पाठद्वये अपि मन्मथः ऋषिः इति विज्ञायते । (तादृशी कादिविद्या समयिनाम् उपास्या इति एतच्छ्लोकोत्तरार्धेन अवगम्यते) अयम् अर्थः च सम्यक् तैत्तिर्यकश्रुतिशिरसि "पुत्रो निर्ऋत्या वैदेहः" इत्यादिश्रुतिशिरसि (उपनिषदि अस्ति इति शेषः) किं च, ऋषिं हित्वा च = ऋषिन्यासादि-बाह्यक्रियाकलापं हित्वा अपि । हृदय-कमले = मनसि । अस्याः = कादिविद्यायाः (अनुसंधानं कार्यमिति) । "नैतमृषिं विदित्वा नगरं प्रविशेद्" इत्यादिमन्त्रखण्डेन विदधाति श्रुतिः । इह भवत्याः पूजाविधिः । समयिनां = समयिभ्यः । अभ्युक्तः = उपासकं प्रति चोदनापूर्वकम् उक्तः इति भावः ॥२२॥

अथ त्रिखण्ड-मन्त्र-सरघा-षडब्जानामन्योन्यसंबन्धनिरूपणम्—

**त्रिखण्डस्त्वन्मन्त्रस्तव च सरघायां निविशते**
**श्रियो देव्याः शेषो यत इह समस्ताः शशिकलाः ।**
**त्रिखण्डे त्रैखण्ड्यं निवसति समन्त्रे च सुभगे**
**षडब्जारण्यानि त्रितययुतखण्डे निवसति ॥२३॥**

सुभगे हे देवि ! तव मन्त्रः त्रिखण्डः । स तु, तव सरघायां निविशते (ऐक्यं भवति इति भावः) यतः, समस्ताः = सादाख्य-कलासहिताः शशिकलाः । इह = सरघायां निवसन्ति । (ततः) श्रियः देव्याः, शेषश्च = शेषभूत-'श्रीं'-रूपचतुर्थखण्डः च निवसति इति अन्वयः । तद्यथा, त्रिखण्डे, त्रैखण्ड्यं = चन्द्रसूर्याग्न्यात्मक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिखण्डसंबन्धि, इदं "त्रिखण्डं ते चक्रम्" इत्याद्यष्टमश्लोकरीत्या; तथा तव मनुः अपि "त्रिखण्डे त्वन्मन्त्रे" इत्यादिविंशति-श्लोकरीत्या; षडब्जारण्यानि इति तावत् "त्रिकोणं चाधारम्" इत्यादि-दशमश्लोकरीत्या; त्रितययुतखण्डे निवसति ॥२३॥

अथ खण्डत्रयस्य स्वान्तलयनिरूपणपूर्वकं, षोडशदलादित्रिचक्रेषु एव मातृकालयनिरूपणम्—

**त्रयं चैतत्स्वान्ते परमशिवपर्यङ्कनिलये**
**परे [1]सादाख्येऽस्मिन् निवसति चतुर्थैक्यकलनात् ।**
**स्वरास्ते लीनास्ते भगवति कलाश्रे च सकलाः**
**ककाराद्या वृत्ते तदनु चतुरश्रे च यमुखाः ॥२४॥**

पाठान्तरम्—(१) सादाख्यास्मिन् ।

हे परमशिवपर्यङ्कनिलये ! इति देवीसम्बोधनम् । उक्तखण्डत्रयं, स्वान्ते = आज्ञाचक्रे, सादाख्ये निवसति लयम् आप्नोति इत्यर्थः । तल्लयः, चतुर्थैक्यकलनाद् इति ज्ञापयति । अथ, मातृका सर्वा अपि श्रीचक्रस्थषोडशदल-वृत्तत्रय-भूपुरत्रयरूपस्थानत्रये एव यथाक्रमम् । षोडश-स्वराः, पञ्चविंशति[२५]कादयः, यमुखाः दश च, चतुर्थैक्य-कलनाद् विलीनाः स्युः । भगवति इति देवीसम्बोधनम् ॥२४॥

अथ उक्तषोडशदलादिशिवचक्रत्रयपूरकमिभदलं शांभवमिति शिव-शक्तिचक्रचतुष्टययोः अभेदमिति च निरूप्य नित्यास्वरूपकथनम्—

**हलो बिन्दुर्वर्गाष्टकमिभदलं शांभववपु-**
**श्चतुश्चक्रं [1]शक्रस्थितमनुभयं शक्तिशिवयोः ।**
**निशाद्या दर्शाद्याः श्रुतिनिगदिताः [2]पञ्चदशधा**
**[3]भवेयुर्नित्यास्तास्तव जननि मन्त्राक्षरगणाः ॥२५॥**

पाठा०—(१) शक्तास्थित०; शक्तौ स्थित० । (२) पञ्चदश ता । (३) भवेयुर्नित्याप्तास्तव ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हल: = कादिक्षान्ता:, बिन्दु: [च]; वर्गाष्टकं = क-च-ट-त-प-य-श-ळ-वर्गादिवर्णैः युत: बिन्दुवर्गाष्टकं भवति, तल्लयस्थानम् [ एतेन आराधितम् ] इभदलं = अष्टदलचक्रं पूर्वश्लोकोक्त-षोडशदलादि-चक्रत्रयसहितं चतुश्चक्रं शांभवशरीरं स्यात्; तथा शक्रस्थितं = शक्रोपरिस्थितं, चतुर्दशारोर्ध्वस्थितम् इत्यर्थ: । एतेन शक्तिचक्रचतुष्टयं स्मारितम् । शक्तिशिवयो: एतदुभयम्, अनुभयम् एव–अद्वैतम् एव–एकम् एव इति अर्थ: । शक्तिचक्र-चतुष्टयं तु, "त्रिकोणे ते वृत्त०" इत्याद्येकादशश्लोकोक्तम् इति ज्ञेयम् । निशाद्या: = कृष्णपक्षप्रतिपदाद्या:, दर्शाद्या: = शुक्लपक्षप्रतिपदाद्या: च; पञ्चदशधा = पञ्चदश-पञ्चदशप्रकारेण तिथय: । श्रुतिग-दिता: सन्ति, ता: तावत्, हे जननि ! तव मन्त्राक्षरगणा: भवन्ति। अत्र निशाद्या: नाम कृष्णपक्ष-प्रतिपदाद्या: इति अर्थ:, यथा– "निशाद्या:" इत्यत्र निशापदेन लक्षणया तम: गृह्यते, तस्य तल्लक्षणत्वात् तादृशतमस: अस्मिन् पक्षे [रात्रिषु ज्योत्स्नाह्रास-भावेन] क्रमवृद्धिमत्त्वाद्, अस्य पक्षस्य तम:पक्ष: इति कृष्णपक्ष: इति निशापक्ष: इति वा प्रसिद्धे: तत्तथोक्तम् ।।२५।।

अथ षोडशीशशिकलाविवृति: अयम्-अक्-प्रत्याहारविवरणं च—

**इमास्ता: षोडश्यास्तव च सरघायां शशिकला-**
**स्वरूपायां लीना निवसति तव श्रीशशिकला ।**
**अयं प्रत्याहार: श्रुत इह कलाव्यञ्जनगण:**
**ककारेणाकार: स्वरगणमशेषं कथयति ।।२६।।**

हे जननि ! इमा: पूर्वोक्ता: नित्यास्थानीया:; ता: = शशिकला: । तव शशिकलास्वरूपायां सरघायां लीना: । तव, षोडश्या: ( चतुष्कूटासम्बन्धिन्य: ) श्रीशशिकला ( सादाख्या )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च; निवसति = सरघायां विलीना भवति इति भावः । इह 'अयम्' इति प्रत्याहारः ( कृतः ) । अनेन कळागणः व्यञ्जन-गणः च सकलः अपि श्रुतः ( श्रावितः = कथितः इति भावः ) । यथा, 'यमुखाः' इति यादिदशकं, यकारेण, स्मारितं, ''त्रयं चैतत्स्वान्ते'' इत्यादिचतुर्विशे श्लोके । तादृशः यकारः प्रत्याहा-राङ्गतया अत्र स्वीकृतः । अतः तेन अकारदिना अयम् इति रूपसिद्धिः । एतेन सर्वा अपि मातृका कलाव्यञ्जनगणरूपा 'अयम्' इति प्रत्याहारेण स्वीकृता । ककारेणाकारः 'अक्' इति प्रत्याहारः तु स्वरगणम् अशेषं कथयति हि ॥२६॥

अथ क्षकारातिशयस्य मणिपूरे समयिपूजाविशेषस्य च निरूपणम्–

**क्षकारः पञ्चाशत्कल इति [1]हलो बैन्दवगृहं**
**[2]ककारादूर्ध्वं स्याज्जननि तव नामाक्षरमिति ।**
**भवेत्पूजाकाले मणिखचितभूषाभिरभितः**
**प्रभाभिर्व्यालीढं भवति मणिपूरं सरसिजम् ॥२७॥**

पाठा०—(१) हरो । (२) क्षकारा० ।

क्षकारः, पञ्चाशत्कलः = पञ्चाशद्वर्णरूपः । हरस्व-रूपस्य हकारस्य बैन्दवगृहं च । हे जननि ! तादृशक्षकाराद् ऊर्ध्वम् ( उपरि ) तव नाम विद्यते 'अक्षरः' इति । अत्र 'ककाराद्' इत्यत्र 'क्षकाराद्' इति पाठान्तरम् । इदम् एव साधु इव भाति । ( अथ ) तव पूजाकाले मणिपूरचक्रं, मणि-खचित-भूषासंजनित-प्रभाभिः व्यालोढं भवति समयिनाम् इति भावः ॥२७॥

अथ चक्रेषु मणिपूरं द्वितीयमिति केषांचित्पक्षं, तृतीयमिति समयिपक्षं च निरूप्य, अनाहते वायूत्पत्तिनिरूपणम्—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वदन्त्येके वृद्धा मणिरिति जलं तेन निबिडं**
**परे तु त्वद्रूपं मणिधनुरितीदं समयिनः ।**
**अनाहत्या नादः[2] प्रभवति सुषुम्णाध्वजनित-**
**स्तदा वायोस्तत्र प्रभव इदमाहुः समयिनः ॥२८॥**

पाठा० – (१) लीननिबिडं । (२) सादः ।

एके वृद्धाः मणिः नाम जलम् इति, तेन निबिडं चक्रं [स्वाधिष्ठानं] द्वितीयम् एव भवति । एतदनुरुद्धम् एव सौन्दर्यलहरीप्रोक्तं मणिपुरस्य द्वितीयचक्रत्वम् । हे जननि ! परे समयिनः तु इदं त्वद्रूपं मणिधनुरिति = मणिधनुः [इन्द्रधनुः] कान्तिकान्तम् इति भाषन्ते । सुषुम्णानाडीमार्गमध्यजनितनादः तु अनाहताद् आरभ्य अभिव्यज्यते । अतः तदभिव्यञ्जनहेतुभूत-वायोः उत्पत्तिः अनाहते कथिता समयिभिः ॥२८॥

अथ अनाहतस्य संवित्कमलत्वकथनं तदुपर्याकाश-सदाशिव-निरूपणं च–

**तदेतत्ते संवित्कमलमिति संज्ञान्तरमुमे**
**भवेत्संवित्पूजा भवति कमलेऽस्मिन् समयिनाम् ।**
**विशुद्धाख्ये चक्रे वियदुदितमाहुः समयिनः**
**सदापूर्वो देवः शिव इति हिमानीसमतनुः ॥२९॥**

हे उमे ! ते = त्वत्सम्बन्धि एतत्पूर्वश्लोकोक्तम् अनाहतचक्रं यत् तस्य संवित्कमलम् इति संज्ञान्तरम् अस्ति । तत्र समयिनः कुर्वन्ति संवित्पूजाम् । अथ एतदुपस्थितविशुद्धाख्ये चक्रे । वियद् = आकाशः अजनि इति समयिनः प्राहुः । तदुपर्याज्ञाचक्राधिष्ठाता देवः, हिमानीसमतनुः = हिमसंहतिकान्तितुलितकान्तिमान् सदाशिवः इति च ॥२९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ विशुद्धचक्रे देवीपूजायाः, सहस्रारे नित्याकलायाः च विवरणम्—

**त्वदीयैरुद्योतैर्भवति च विशुद्धाख्यसदनं**
**भवेत्पूजा देव्या हिमकरकलाभिः समयिनाम् ।**
**सहस्रारे चक्रे निवसति कलापञ्चदशकं**
**तदेतन्नित्याख्यं भ्रमति सितपक्षे समयिनाम् ॥३०॥**

हे जननि ! त्वदीयैरुद्योतैः = त्वत्कान्तिभिः । विशुद्धचक्रं समयिनां पूजाकाले, भवति = उद्योतितं भवति इति भावः । तत्र चन्द्रकलाभिः तव पूजां कुर्वन्ति समयिनः । अतः ऊर्ध्वं सहस्रारे पञ्चदशचन्द्रकलाः सदा निवसन्ति । अतः तन्नित्याख्यं नित्यासंज्ञितं चन्द्रकलापञ्चदशकं समयिनां शुक्लपूजायां परिभ्रमन् आस्ते ॥३०॥

अथ समयिनां शुक्लपक्षपूजाकारणं, ब्रह्मग्रन्थ्यादित्रयविवरणं च—

**अतः शुक्ले पक्षे [1]प्रतिदिनमिह त्वां भगवतीं**
**निशायां सेवन्ते निशि चरमभागे समयिनः ।**
**शुचिः स्वाधिष्ठाने रविरुपरि संवित्सरसिजे**
**शशी चाज्ञाचक्रे हरिहर(हरहरि)विधिग्रन्थय इमे ॥३१॥**

पाठान्तरम्—(१) प्रतिदिनमहस्त्वां ।

हे देवि ! अतः = पूर्वश्लोकोक्तकारणेन, शुक्लपक्षे प्रतिदिनम् । इह [अस्य पाठान्तरम्] अहः = अहःकाले = ज्योत्स्नाविशिष्टरात्रिपूर्वभागे इत्यर्थः । तथा निशापक्षे तु [कृष्णपक्षे तु] निशि, चरमभागे, समयिनः तव पूजां कुर्वन्ति । अथ ग्रन्थिविवरणम्, अग्निः स्वाधिष्ठाने, तदुपरि अनाहते रविः, तदन्तरम् आज्ञाचक्रे [भ्रूमध्ये] चन्द्रः, एवं स्थितेषु चक्रेषु विलोमेन, हरहरि-विधिग्रन्थयः वर्तन्ते इति शेषः । तथा च उक्तं ललितासहस्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नामसु तु "मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी" इत्यादि। अत्र अहःपदार्थविमर्शः, "हलो बिन्दुः" इत्यादिपञ्चविंशतितमश्लोके, निशाद्याः दर्शाद्याः इतिक्रमेण कृष्णपक्षीयाणां तिथीनां सङ्केतः कृतः। अत्र निशा नाम कृष्णपक्षः चेत् तदितरः दर्शः, यथा शुक्लः तथैव अत्र निशेतरशुक्लः अपि अहःपदवाच्यः कालः भवेद् इति ज्ञेयः ॥

एवमप्यहःपदेन ज्योत्स्नाविशिष्टरात्रिभागः ज्ञेयः, यथा अहर्नामा सौरतेजोविशिष्टकालविशेषः। सः द्विविधः शुद्धः मूर्च्छितः[1] इति। तत्र आद्यः शुद्धसौरातपविशिष्टः द्वितीयः पुनः चन्द्रातप[ज्योत्स्ना]-विशिष्टः इति। अतः अत्र समयिनां पूजाविषये अहःपदेन द्वितीयः चन्द्रातपविशिष्टः। [शुक्लपक्षे तावद्] रात्रिपूर्वभागे एव ग्राह्यः। कृष्णपक्षे तु "निशायां [कृष्णपक्षे] सेवन्ते चरमभागे समयिनः" इति ज्योत्स्नाविशिष्टरात्रिचरमभागस्य एव ग्रहणात्। अयम् अर्थः तु "नवो-नवो भवति" इति मन्त्रार्थविचारे समवगम्यते हि। एतेन अपि उक्तपूर्वार्थः स्पष्टतरः भवति। एवमेव सर्वत्र क्लिष्टस्थलेषु विमर्शः कर्तव्यः ॥३१॥

---

१. मूर्च्छितः = चन्द्रजलादिषु प्रतिबिम्बितसौरतेजोविशिष्टकालविशेषः॥ अत्र चन्द्रमूर्च्छितं सौरतेजस्तु ज्योत्स्नेति भण्यते। जलमूर्च्छितं पुन इयत्कालावधिसौरतेजो मूर्च्छितं, रक्तपीतादिकाचपात्रान्तःस्थितं, जलं, भेषजं भवेदित्यादि; जलमूर्च्छितसौरतेजोविषयस्तु "कोमोपथि-" नामक-वैद्यविज्ञानादवगन्तव्यः। तथा वायुमण्डलमूर्च्छित "आल्ट्रा वायलेट्" "इन्फ्रा रेड" इत्यादि सौरतेजसां स्वरूपगुणादयश्च विज्ञेया आङ्ग्लवैद्यविज्ञानेन; श्रुतिषु चावगम्यते, अरुणप्रश्नादिषु ॥३३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ समयिनाम् अमावास्यापूजाभावे हेतुनिरूपणम्—

**कलायाः षोडश्याः प्रतिफलितबिम्बेन सहितं**
**तदीयैः पीयूषैः पुनरधिकमाप्लावितततनुः ।**
**सिते पक्षे सर्वास्तिथय इह कृष्णेऽपि च समा**
**यदा चामावास्या भवति न हि पूजा समयिनाम् ॥३२॥**

अमायां षोडशीकलायाः सादाख्यायाः प्रतिबिम्बसहितं [चक्रमण्डलं] भवति । उत तदीयामृतेन आप्लावितततनुः च उपासकः । तस्माद् अमापूजा न अस्ति समयिनाम् । इह समयिपूजाविधौ अमेतरशुक्लकृष्णपक्षतिथयः सर्वे अपि समाः एव ॥३२॥

अथ अमायाः, आज्ञाचक्रस्थचन्द्रबिम्बस्य च, स्वरूपनिरूपणम्—

**इडायां पिङ्गल्यां चरत इह तौ सूर्यशशिनौ**
**तमस्याधारे तौ यदि तु [1]मिलितौ सा तिथिरमा ।**
**तदाज्ञाचक्रस्थं शिशिरकरबिम्बे(बं) रविनिभं**
**दृढव्यालीढं सद्विगलितसुधासारविसरम् ॥३३॥**

पाठा०—(१) तुलितौ ।

इडा-पिङ्गला-नामनाड्योः क्रमेण रविशशिनौ चरतः । तादृशरविशशिनौ यदा तमोमय(भूत)मूलाधारचक्रे मिलितौ तदा तिथिः अमावास्या भवति । तादृशामातिथौ आज्ञाचक्रस्थितशशिबिम्बे (शशिबिम्बं) रविनिभं (ज्योतिःप्रादुर्भावे न इति शेषः) दृढव्यालीढं सत् (ज्योत्स्नया इति विज्ञेयम् । उत्तरश्लोकतात्पर्येण) विगलितसुधासारविसरं च । भवति इति शेषः ॥३३॥

अथ पूर्वश्लोकोक्तज्योतिःकारणनिरूपणम्—

**महाव्योमस्थेन्दोरमृतलहरीप्लावितततनुः**
**[1]प्रशुष्यद्वै नाडीप्रकरमनिशं प्लावयति तत् ।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**यदाज्ञायां विद्युन्नियुतनियुताभाक्षरमयी**
**[२]स्थिता विद्युल्लेखा भगवति ! विधिग्रन्थिमभिनत् ।३४।**

पाठा०—(१) प्रशुष्यद्वैशन्त० । (२) सिता ।

पूर्वोक्तज्योतिःकारणं महाव्योमस्थेन्दोः = सहस्रारगतचन्द्रबिम्बात्, प्रसृतामृतलहरी या विद्यते तया प्लाविततनुः यस्य तादृशः भवति इति शेषः । स तावत् (पूर्वश्लोकोक्ताज्ञाचक्रस्थितशशिबिम्बे एव) तद्बिम्बः, प्रशुष्यद्वैनाडीप्रकरम् । उत, प्रशुष्यद्वैशन्त(स्थितनाडी)प्रकरं = शुष्यत्पल्वलम् इव भासमाननाडीमण्डलसमूहं (७२-सहस्रनाडीसमूहम्) अनिशं (सुधया) प्लावयति । एवं कदा भवेत् ? इति आकाङ्क्षायाम् । हे अम्ब ! यदा आज्ञायाम् = आज्ञाचक्रे सहस्रविद्युत्पुञ्जवद्भासमाना अक्षरमयी (नाशशून्या) कुण्डलिनी स्थिता सती ब्रह्मग्रन्थिम् अभिनत्, तदा इति पूर्वेण अन्वयः ।।३४।।

अथ कुण्डलिन्याः आज्ञाचक्रात् सहस्रारगमनं निरूप्य श्रीचक्रसरघाबैन्दवकथनम्——

**ततो गत्वा ज्योत्स्नामयसमयलोकं समयिनां[१]**
**पराख्या सादाख्या जयति शिवतत्त्वेन मिलिता ।**
**सहस्रारे पद्मे शिशिरमहसां बिम्बमपरं**
**तदेव श्रीचक्रं सरघमिति तद्बैन्दवमिति ।।३५।।**

पाठान्तरम्—(१) ससमया ।

ततः = आज्ञाचक्रतः, गत्वा = ज्योत्स्नामयसमयलोकं (सहस्रारं) गत्वा इति यावत् । का ? समयिनाम् उपास्या पराख्या = परा-नाम्नी, सादाख्या या, तादृशी सा, शिवतत्त्वेन = सहस्रारस्थतत्त्वेन मिलिता सती, जयति = सर्वोत्कर्षेण वर्तते । तदा तत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सहस्रारपद्मे, शिशिरमहसां = चन्द्रतेजसां, बिम्बम्, अपरं = परं न विद्यते यस्मात् तादृशम् (अद्वितीयम् इति भावः) प्रत्यक्षीभवति इति शेषः। तदेव श्रीचक्रम् इति सरघम् इति, बैन्दवम् इति व्यवह्रियते ॥३५॥

अथ परमतनिरूपणम्--

**वदन्त्येके सन्तः परशिवपदे तत्त्वमिलिते**
**ततस्त्वं [1]षड्विंशी भवसि शिवयोर्मेलनवपुः।**
**त्रिखण्डेऽस्मिन् स्वान्ते परमपदपर्यङ्कसदने**
**परे सादाख्येऽस्मिन् निवसति [2]चतुर्धैक्यकलनात् ॥३६॥**

पाठा०—(१) षट्त्रिंशा। (२) चतुर्थैक्य०।

एके सन्तः एवं वदन्ति। कथमिव ? हे भगवति! कुण्डलिनीशक्तिस्वरूपिणि! तत्त्वमिलिते = सर्वतत्त्व (पञ्चविंशतितत्त्व)-मेलनरूप-परशिवपदे = सहस्रारे, (त्वं) यतः लीना असि ततः त्वं षड्विंशी भवसि। तथा भवितुं किं कारणम् इति चेत् शिवयोः मेलनवपुरूपा एव भवती। अतः शिवस्य पञ्चविंशति तत्त्वसंख्या, त्वाम् अनुसृता इति भावः। अतः त्वाम् एवं च कथयन्ति, सादाख्ये स्वान्तचक्रे (आज्ञाचक्रे)। त्रिखण्डे = तृतीयखण्डे, परे = उत्कृष्टे, परमपदपर्यङ्करूपसदाशिवस्थाने (चतुर्विंशश्लोकोक्त-रीत्या) चतुर्धैक्य कलनात्, सा कुण्डलिनीरूपिणी देवी निवसति, इति एके सन्तः वदन्ति इति च पूर्वेण अन्वयः ॥३६॥

अथ (चतुर्धैक्यकलनानन्तरं) त्रिखण्डभावनायां त्रिधैक्यनिरूपणम्—

**[1]क्षितौ वह्निर्वह्नौ वसुदलजले दिङ्मरुति दिक्-**
**[2]कलाश्रे मन्वश्रं दृशि [3]वसुरथो राजकमले[लं]।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**[४]प्रतिद्वैतग्रन्थिस्तदुपरि चतुर्द्वारसहितं**
**[५]महीचक्रं चैकं भवति भगकोणैक्यकलनात् ॥३७॥**

इति मन्त्रचक्रैक्यम् ॥

पाठान्तराणि—(१) महावह्नि०। (२) कलारे। (३) वसुरथो। (४) प्रतिद्व्यैतद्ग्रन्थि०। (५) महाचक्रं।

क्षितिः = मूलाधारम्। जलं = स्वाधिष्ठानम्। मरुत् = अनाहतम्। कलास्त्रं = विशुद्धम्। दृक् = आज्ञाचक्रम् इति शरीरचक्राणि। वह्निः = त्रिकोणम्। वसुदलं = अष्टास्रम्। दिक् = दशारम्। मन्वस्त्रं = चतुर्दशारम्। वसुः = वसुदलम्। राजकमलं = षोडशदलम् इति श्रीचक्रस्थचक्राणि। एवं प्रथमं ज्ञातव्यम्। अथ अन्वयः, क्षितौ वह्निः एक्यम् अभूद् इति भावयेत्। वह्नौ तु वसुदलजले ( अष्टास्रस्वाधिष्ठानचक्रे भावयेत् नाम; तयोः ऐक्यं भावयेत् ) एतावता प्राथमिकः अग्निखण्डः निरूपितः भवति। अथ दिङ्मरुति, दशदलात्मकमणिपुर-विशिष्ट-मरुति = अनाहते; दिक् = दशारद्वयं विलीनं भवति। अत्र मरुन्नाम वायुः, एतेन सूर्यः लक्ष्यते। यथा, 'नभांसि जुहोति' ( तै० ब्रा० ३-८-१८ ) इत्यादिना, वायुः नाम रुद्रः इति। 'रुद्रो वा एष यदग्निः,' 'उतैनं गोपा अदृशन्नदृशन्नुदहार्यः' ( नमकम् ) इत्यादिश्रुतिभिः रुद्रः नाम सूर्यः इति च विज्ञायते। अतः एतेन द्वितीयः सूर्यखण्डः निरूपितः। अथ कलाश्रे ( विशुद्धचक्रे ) मन्वस्त्रं (चतुर्दशारम्)। दृशि आज्ञाचक्रे वसुः वसुदलं विलीनं स्यात्। राजकमलं षोडशदलपद्मं च, विलीनं स्याद् इति शेषः। अनेन सोमखण्डः निरूपितः। तदुपरि, प्रतिद्वैतग्रन्थिः = द्वैत-परिपन्थी [ केवलाद्वैतप्रतिपादकः बिन्दुः ] चतुर्द्वारसहित-महीचक्रं भूपुरं च एकं भूत्वा। उपरि = सर्वोपरि [ सोम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खण्डोपरि ] भवेद् इति अन्वयः। एवं भगकोणैक्यकलनाद् अन्वयः इति ॥

अत्र भगपदेन सूर्यः स्मार्यते, अतः द्वादशसंख्या च। अत्र भूपुरे प्राकारत्रयसद्भावात् प्रत्येकप्राकारस्य चतुःकोण-सद्भावात् च आहत्य द्वादशकोणाः भवन्ति। अतः भगकोणैक्यकलनं बिन्दौ युज्यते एव। बिन्दोः त्रिवृत्तस्वरूपत्वाद् [ दृश्यतां, सप्तदशः श्लोकः तद् एकत्र एव त्रिवृत्तास्तित्वं द्योतयति हि ] बिन्दुचतुष्कोणयोः अस्ति खलु अर्थसाम्यम्। एतेन पूर्णरूपबिन्दोः एकस्मिन् एव महीचक्रे [ भूपुरे ] समन्वय[विलीन]प्रतिपादनेन एकस्मिन् परिमाणौ अपि बिन्दुसमन्वयः [लयः] भवेद् इति विज्ञायते—'सर्वं खल्विदं ब्रह्म' इति श्रुतेः ॥३७॥ इति मन्त्रचक्रैक्यम् ॥

अथ क्रियापञ्चकसमामिति तडिद्रूपामिति च श्रीदेवीनिरूपणम्—

**[1]षडब्जारण्ये त्वां समयिन इमे पञ्चकसमां**
**यदा संविद्रूपां विदधति च षोढैक्य[2]कलिताम्।**
**मनो जित्वा चाज्ञा[3]सरसिज इह प्रादुरभवत्**
**तडिल्लेखा नित्या भगवति तवाधारसदनात् ॥३८॥**

पाठा०—(१) षडब्जारण्यैस्त्वां। (२) ०कलितम्। (३) सरसिजमिह।

हे भगवति ! इमे समयिनः त्वां, षडब्जारण्ये = मूलाधारादिषट्चक्रदेशे, पञ्चकसमां = पञ्चकृत्यस्वरूपां [ सृष्ट्यादि पञ्चकृत्यपरायणाम् इति भावः ] अतः एव षोढैक्यकलितां, संविद्रूपां = ज्ञानस्वरूपिणीं च, यदा, विदधति = भावयन्ति; किं कृत्वा ? मनो जित्वा; तदा आज्ञासरसिजे, इह, तव [ त्वत्सम्बन्धिनी ] नित्या, तडिल्लेखा, आधारसदनात्, प्रादुरभवत् [ तेषाम् इति शेषः ] ॥३८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कौलादिपक्षाणां, मुनेश्च, स्वरूपनिरूपणम्—

**भवत्साम्यं केचित् त्रितयमिति [1]कौलप्रभृतयः**
**परं तत्त्वाख्यं [2]चेत्यपरमिदमाहुः समयिनः ।**
**क्रियावस्थारूपं प्रकृतिरभिधापञ्चकसमं**
**तदेषां साम्यं [3]स्यादवनिषु च यो वेत्ति स मुनिः ॥३९॥**

इत्यैक्यनिरूपणम् ।

पाठा०—(१) कौम्भप्र० । (२) चेत्स पर इद०; परमिद० ।
(३) त्वामवनिषु ।

हे भगवति ! केचित्कौलप्रभृतयः = पूर्वकौलोत्तरकौलादयः केचन, त्रितयमिति = सृष्टि-स्थिति-लयरूप-त्रितयम् एव, भवत्साम्यं = भवद्रूपम् इति मन्यन्ते । इह = एतत्संदर्भे, समयिनः तु परं तत्त्वं च आहुः । अपि च अपरम् इदं वक्ष्यमाणम् आहुः । किं तत् ? प्रकृतिः = मूलप्रकृतिः, क्रियावस्थारूपं यत् । अभिधा-पञ्चकसमं = सृष्टि-स्थिति-संहार-तिरोधानानुग्रह-इत्यभिधापञ्चकं यत् तत्समम्, एषां = समयिनां, साम्यं स्याद् इति शेषः । एतदुभयं यः वेत्ति सः मुनिः = मौनी अद्वैती इति यावत् ॥३९॥
इत्यैक्यनिरूपणम् ॥

अथ प्रस्तारत्रयप्रकृतिनिरूपणम्—

**वशिन्याद्या अष्टावकचटतपाद्याः प्रकृतयः**
**स्ववर्गस्थाः स्वस्वायुधकलितहस्ताः स्वविषयाः ।**
**[1]यथावर्गं वर्णप्रचुरतनवो याभिरभवं-**
**स्तव प्रस्तारास्ते त्रय इति जगुस्ते समयिनः ॥४०॥**

पाठा०—(१) यदा वर्गा वर्णप्रचुरतरवो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हे भगवति ! ते समयिनः तव त्रयः प्रस्ताराः याभिः प्रकृतिभिः अभवन् इति जगुः ताः तावद्, अ-क-च-ट-त-पादि-शब्देन य-श-वर्गाऽऽद्यक्षरस्वरूपाः वशिन्याद्याः अष्टौ प्रकृतयः। ताः कथंभूताः ? स्वस्ववर्गस्थाः, वर्णाः = अक्षराः, ये तत्स्वरूपाः । स्वस्वायुधकलितहस्ताः स्वस्वविषयप्रवृत्तव्यापाराः। यथावर्गं = वर्गस्थवर्णानुगुणम् । प्रचुरतनवः = प्रकृष्टशरीराः [विस्तृतिवत्यः]। "तरवः" इति पाठान्तरे तु संसारातपाद् रक्षकाः। एवंप्रकारप्रकृत्यष्टकम् अत्र प्रस्तारत्रयविषये समयिनाम् उपकरणं भवति इति भावः। अत्र एतद्विवरणभूतः अस्मत्कृतः अस्ति प्रस्तारभास्करः नाम ग्रन्थः षड्विंशतिश्लोकात्मकः [स एव एतद्ग्रन्थान्ते द्रष्टव्यः] ॥४०॥

अथ उक्तप्रस्तारत्रयविवरणम्—

**इमा नित्या वर्णास्तव चरणसंमेलनवशान्-**
**महामेरुस्थाः [1]स्युर्मनुमिलनकैलासवपुषः ।**
**वशिन्याद्या एता अपि तव[2] सबिन्द्वात्मकतया**
**महीप्रस्तारोऽयं क्रम इति रहस्यं समयिनाम् ॥४१॥**

इति प्रस्तारत्रयनिरूपणम् ।

पाठ०—(१) स्थास्यन् मनु० । (२) च सहबि० ।

हे देवि ! नित्याः वर्णाः = अचः । तव चरणसंमेलनवशात् = ऐं श्रीं इत्यादि त्वच्चरणसंयोगवशात् । मेरुप्रस्तारः = त्वन्मन्त्रसंयोगवशात् कैलासप्रस्तारः च निष्पद्यते । एताः पूर्वश्लोकोक्ताः वशिन्याद्याः अपि [अ-क-च-टादयः अपि] बिन्दुसहिताः चेत् महीप्रस्तारः [भूप्रस्तारः] संपद्यते समयिनाम् इति रहस्यम् । एतद्ग्रन्थान्ते च एतद्विषयविशेषः द्रष्टव्यः ॥४१॥

इति प्रस्तारत्रयनिरूपणम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कौल-वाम-मतनिरूपणम्—

**भवेन्मूलाधारं तदुपरितनं चक्रमपि तद्**
**द्वयं तामिस्राख्यं शिखिकिरणसंमेलनवशात् ।**
**तदेतत्कौलानां प्रतिदिनमनुष्ठेयमुदितं**
**भवत्या वामाख्यं मतमपि परित्याज्यमुभयम् ॥४२॥**

हे देवि ! भवत्याः वामाख्यं = मकारपञ्चकसहितोपासना-रूपं, कौलानां मतं च एतद् उभयं न उपास्यं परित्याज्यम् एव । किं तत्कौलमतम् ? उच्यते, मूलाधारचक्रं, तदुपरिवर्तमानस्वा-धिष्ठानं च एतद्द्वयं तामिस्रनामधेयम् [अन्धकारबन्धुरम्] । एतस्मिन् मणिपूरस्थाग्निकिरणसंमेलनवशात् कौलानां प्रतिदिनम् [अमायाम् अपि] उपास्यं भवति इति उदितम् । एतद् एव कौलमतम् ॥४२॥

अथ कौलपूजाविवरणम्—

**अमीषां कौलानां भगवति ! भवेत्पूजनविधि-**
**स्तव स्वाधिष्ठाने तदनु च भवेन्मूलसदने ।**
**अतो बाह्या पूजा भवति भगरूपेण च ततो**
**निषिद्धाचारोऽयं निगमविरहोऽनिन्द्यचरिते ॥४३॥**

हे अनिन्द्यचरिते ! भगवति ! पूर्वोक्तकौलानां [प्रथमं] पूजा-विधिः स्वाधिष्ठाने, तदनु = पश्चात् । मूलसदने = मूलाधारे च बाह्या पूजा । अतः परं भगरूपेण [उपकरणेन] च पूजा भवति । अयं निषिद्धाचारः, निगमविरहः = वेदमार्गदूरः [ स्याद् इति-शेषः] ॥४३॥

अथ कौलदेवतानिरूपणम्—

**नवव्यूहं कौलप्र[1]भृतिकमतं तेन स विभु-**
**र्नवात्मा देवोऽयं [2]जगदुदयकृद्भैरववपुः ।**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नवात्मा वामादिप्रभृतिभिरिदं भैरववपु[३]**
**र्महादेवी ताभ्यां जनकजननीमज्जगदिदम् ।।४४।।**

पाठा०—(१) प्रभृतिकमिदं । (२) ०क्रुच्छैशववपुः । (३) बैन्दववपुः ।

कौलादिमते देवः नवव्यूहात्मकः । तथा च उक्तं सौन्दर्यलहर्यां "शरीरं त्वं शंभोः" [श्लो० ३४] इत्येतच्छ्लोकव्याख्याने काल-कुल-नाम-ज्ञान-चित्त-नाद-बिन्दु-कला-जीव-इति-नवव्यूहात्मकः देवः इत्युक्तम् । तत्कारणेन स विभुः [देवः] नवात्मा, भैरवनाम्ना (बैन्दवनाम्ना इति पाठान्तरं) प्रसिद्धः । सः एव जगत्स्रष्टा । अथ तेषाम् उपास्या देवी महादेवी [१]वामादिनवप्रकारप्रकृतिभिः भैरववपुः भयजनकवपुः तादृशदेहवती इति भावः । ताभ्याम् = उक्ताभ्यां, भैरव-भैरवीभ्याम् इदं जगत्, जनकजननीमद् भवति ।।४४।।

अथोक्तकौलमतगन्धोऽपि समयिनां नास्तीति निरूपणम्—

**भवेदेतच्चक्रद्वितयमतिदूरं समयिनां**
**विसृज्यैतद्युग्मं तदनु मणिपूराख्यसदने ।**
**त्वया [१]सृष्टैर्वारिप्रतिफलितसूर्येन्दुकिरणै-**
**[२]र्द्विधा लोके पूजां विदधति भवत्याः समयिनः ।।४५।।**

पाठा०—(१) सृष्टे वारि० । (२) ०र्विभालोके ।

हे देवि ! लोके, भवत्याः पूजां द्विधा समयिनः विदधति = कुर्वन्ति । कथम् ? तेषां समयिनां एतत्कौलपूजाचक्रद्वयम् अतिदूरं, अतः तद्युग्मं विसृज्य, तदनु, तदूर्ध्वस्थितमणिपूराख्ये चक्रे त्वया, वारि = जले, सृष्टैः, प्रतिफलितसूर्येन्दुकिरणैः = सूर्येन्दु-

१. वामादि = वामा-ज्येष्ठा-रौद्री-अम्बिका-पश्यन्ती-इच्छा-ज्ञानं-क्रिया-शान्ता-इति नवप्रकृतयः शक्तयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भेदेन द्विधा विभिन्नैः किरणैः करणभूतैः पूजां कुर्वन्ति इति पूर्वेण अन्वयः । द्विधा सृष्टेः इति अत्र "विभालोके" इति पाठान्तरम् । तदा प्रतिबिम्बितकान्तिमयलोके इत्यर्थः वक्तव्यः ॥४५॥

अथ चक्रोत्पत्तिकथनम्——

**अधिष्ठानाधारद्वितयमिदमेवं[1] दशदलं**
**सहस्राराज्जातं [2]मणिपुरमतोऽभूद्दशदलम् ।**
**हृदम्भोजान्मूलान्नृपदलमभूत् स्वान्तकमलं**
**तदेवैको बिन्दुर्भवति जगदुत्पत्तिकृदयम् ॥४६॥**

पाठा०—(१) ०मेतद्दशदलं । (२) मणिपुरमितो० ।

अधिष्ठानाधारद्वितयं = स्वाधिष्ठानसहितमूलाधारम् । इदं = एतच्चक्रद्वयं, दशदलात्मकं, सहस्राराज्जातम् । तदुपरि मणिपुरम् अपि दशदलात्मकम् अभूत् । ततः ऊर्ध्वं हृदयकमलम् । तन्मूलात् = (तस्मात्) नृपदलं (षोडशदलं) विशुद्धचक्रं, ततः स्वान्तकमलम् ( = आज्ञाचक्रम्) अभूत् । एवं बहुप्रकारं विजृम्भितः एकः बिन्दुः एव जगदुत्पत्तिकृत् = मूलाधारादिसर्वचक्रोत्पत्ति-(जगदुत्पत्ति)कृद् भवति ॥४६॥

अथ उक्तार्थस्य भङ्ग्यन्तरनिरूपणम्——

**सहस्रारं बिन्दुर्भवति च ततो बैन्दवगृहं**
**तदेतस्माज्जातं जगदिदमशेषं [1]सकरणम् ।**
**ततो मूलाधाराद् द्वितयमभवत्तद्दशदलं**
**सहस्राराज्जातं तदिति दशधा बिन्दुरभवत् ॥४७॥**

पाठान्तरम्—(१) न करणं ।

पूर्वश्लोकोक्तबिन्दुः नाम सहस्रारचक्रम् एव भवति । किं च तद् एव बैन्दवगृहम् । तस्माद् बिन्दोः एतत् जगत्, सकरणं =

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करणसहितम् (इन्द्रियैः साकं) जातम् । ततः बिन्दोः प्रथमं मूलाधाराद्द्वितयं = चतुर्दलात्मकमूलाधार-षड्दलात्मकस्वाधिष्ठान-रूपचक्रद्वयम् । अभवत् । एतद्वितयं यतः दशदलात्मकमभवत् ततः बिन्दुरूपसहस्रारः अपि दशधा (दशप्रकारम्) अभवद् इति उक्तः ॥४७॥

अथ मूलाधारद्वितयानन्तरोत्पत्ति कथम्—

**तदेतद्बिन्दोर्यद्दशकमभवत्तत्प्रकृतिकं**
**दशारं सूर्यारं नृपदलमभूत्स्वान्तकमलम्[1] ।**
**रहस्यं कौलानां द्वितयमभवन्मूलसदनं**
**[2]तथाधिष्ठानं च प्रकृतिमिह[3] सेवन्त इह ते ॥४८॥**

पाठान्तराणि—०न्नेत्रकमलं । (२) तदा० । (३) ०मथ सेवन्त्विह च ते ।

उक्तप्रकारेण, बिन्दोर्यद्दशकमभवत्, मूलाधार-स्वाधिष्ठानदलदशकमभवत् तद्दशकमेव कारणं कृत्वा तदूर्ध्वं दशारं मणिपुरं तदुपरि स्वान्तकमलम् आज्ञाचक्रम् अभवत् । अत्र = एषु चक्रेषु । कौलानां मूलसदनं तथा अधिष्ठानं स्वाधिष्ठानम् एतद् द्वयं रहस्यमभवत् । एतद्द्वयस्य, इह (चक्रप्रस्तावे) सर्वचक्रप्रकृतित्वात्, तादृशप्रकृतिमेव, ते कौलाः सेवन्ते ॥४८॥

अथ कौल-समयिभेदनिरूपणम्—

**अतस्ते कौलास्ते भगवति ! दृढप्राकृतजना**
**इति प्राहुः प्राज्ञाः कुलसमयमार्गद्वयविदः ।**
**महान्तः सेवन्ते सकलजननीं बैन्दवगृहे**
**शिवाकारां नित्याममृतझरिकामैन्दवकलाम् ॥४९॥**

हे भगवति ! अतः एव ( यतः कौलाः प्रकृत्युपासकाः अतः एव ) दृढप्राकृतजनाः ( अविवेकिनः ) इति । कुल-समयोभय-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मार्ग-ज्ञानिनः । प्राज्ञाः । प्राहुः । महान्तः समयिनः तु, बैन्दव-गृहे, सकलजननीम्, अमृतझरिकां, शिवाकारां, नित्याम् ऐन्दव-कलारूपां त्वां सेवन्ते ॥४९॥

अथ षडब्जानीकस्य कालजनकत्वनिरूपणम्——

**इदं [1]कालोत्पत्तिस्थितिलयकरं पद्मनिकरं**
**त्रिखण्डं श्रीचक्रं मनुरपि च[2] तेषां च मिलनम् ।**
**तदैक्यं षोढा वा भवति च चतुर्धेति च तथा**
**तयोः साम्यं पञ्चप्रकृतिकमिदं शास्त्रमुदितम् ॥५०॥**

पाठा०—(१) कौलोत्पत्ति० । (२) तु ।

इदं पद्मनिकरं षडब्जानीकं कालस्य उत्पत्तिस्थिति-लयात्मक-त्रितयकरं त्रिखण्डरूपं श्रीचक्रात्मकम् । एतद्विषयकः मनुरपि = पञ्चदशी अपि । एतेषां सर्वेषां मेलनम् ऐक्यानुसंधानम् । तदैक्य-प्रकारः तु षोढा चतुर्धा इति तयोः साम्यं पञ्चप्रकृतिकम् इति शास्त्रोदितम् एव । पञ्चप्रकृतिकं = सृष्ट्यादिपञ्चकृत्यात्मकं भूम्यादिपञ्चभूतात्मकम् इति वा ॥५०॥

अथोपासनाफलनिरूपणम्——

**उपास्तेरेतस्याः फलमपि च सर्वाधिकमभूत्**
**तदेतत्कौलानां फलमिह हि चैतत्समयिनाम् ।**
**सहस्रारे पद्मे सुभगसुभगोदेति[1] सुभगे**
**परं सौभाग्यं यत्तदिह तव सायुज्यपदवी ॥५१॥**

पाठा०—(१) ०क्तेति सुभगं ।

एतदुपासनाफलं सर्वाधिक्यं स्यात् । एतत्कौलानां समयिनां च समम् एव । हे सुभगे ! देवि ! समयिनां सहस्रारपद्मे, सुभग-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुभगा = अत्यन्तसुभगा सर्वोत्तमा तव सायुज्यपदवी उदेति। तद् एव परम् उत्कृष्टं सौभाग्यं भवति इति शेषः ॥५१॥

अथैतत्सिद्धौ गुरुकृपायाः करुणत्वनिरूपणम्—

**[1]अतोऽस्याः संसिद्धौ सुभगसुभगाख्या गुरुकृपा-**
**कटाक्षव्यासङ्गात् स्रवदमृतनिष्यन्दसुलभा ।**
**तया विद्धो योगी विचरति निशायामपि दिवा**
**दिवा[2] भानू रात्रौ विधुरिव कृतार्थी कृतमतिः[3] ॥५२॥**

पाठान्तराणि—(१) अतस्ते संसिद्धा। (२) दिवा वा रात्रौ वा। (३) कृतार्थीकृत इति।

॥ इति श्रीगौडपादाचार्यविरचिता सुभगोदयस्तुतिः समाप्ता ॥

अतः = उक्तप्रकरेण, अस्याः उपासनायाः, संसिद्धौ = सिद्धिविषये, सुभगसुभगाख्या = अत्यन्तसुभगा, कटाक्षव्यासङ्गात् स्रवदमृतनिःष्यन्दसुलभा गुरुकृपा [ संपादनीया इति भावः ]। तया गुरुकृपया। विद्धः = युक्तः। योगी = योगाभ्यासरतः। निशायामपि, दिवा = अह्नि इव, विचरति। दिवा भानुः तु रात्रौ चन्द्रः इव भासते [ तस्य इति शेषः ]। नित्यतृप्तमनस्कः कृतार्थः अस्मि इति भावनावान् च विचरति ॥५२॥

इति सुभगोदयस्तुतेर्भावबोधिनी नाम टीका श्रीपरिपूर्णप्रकाशानन्दभारतीमहास्वामिकृता समाप्ता ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## अथ प्रस्तारभास्करः

# उपोद्घातः

मूलप्रकृतिराद्येका जीवभावानुरोधतः ।
आदित्यश्चाम्बिका विष्णुर्गणनाथो महेश्वरः ॥ १ ॥
इत्यादिभेदभिन्नाऽभूत्सैषा श्रीपदशब्दिता ।
तदुपासनमुज्झित्वा परमात्मा न गोचरः ॥ २ ॥
यस्मात्स नामरूपांशभिन्नो ज्ञानैकगोचरः ।
तस्मादुपासना देव्यास्तन्त्रेषु प्रथिता पृथक् ॥ ३ ॥
वेदेऽपि सैषा श्रीदेवी गायत्रीपदलक्षिता ।
मुक्तये चित्तशुद्ध्यर्थमादौ श्रीदेव्युपासनम् ॥ ४ ॥
आत्मैव जीवस्तद्भिन्नो भाति प्रकृतिवैभवात् ।
[1]तदनाराध्यतां देवीं मुक्तो नैव भवेन्नरः ॥ ५ ॥
अतोऽवश्यमुपास्यैषा श्रीदेवी ज्ञानसिद्धये ।
क्रियाशक्तिस्वरूपेयमिति वेदान्तडिण्डिमः ॥ ६ ॥
प्रकृतेः कर्तृता [2]तावदात्मसान्निध्यवैभवात् ।
तस्मादेवोपास्यतास्याः [3]जीवभूतेति सेरिता ॥ ७ ॥
उपासनोपकरणं नाम-रूपमिति द्विधा ।
[4]ते भूकैलासमेर्वाख्य-भेदभिन्ने पृथक्पृथक् ॥ ८ ॥
एवं बभूवुष्षड्धा ते[5] षडध्वानः प्रकीर्तिताः ।
[6]पक्षान्तरे षडध्वानः [7]सौरशाक्तादिभेदतः ॥ ९ ॥
एवं षडध्वविवृतिं विशदीकुरुते ह्ययम् ।
प्रस्तारभास्करान्वर्थनामाप्नोति च सन्मुदे ॥१०॥

इत्युपोद्घातः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ ग्रन्थारम्भः—

अस्ति भाति प्रियं नाम रूपमित्यंशपञ्चकम् ।
अत्रान्त्ययोः प्राकृतत्वात् क्रियासम्बन्धिनौ हितौ ॥ १ ॥
[८]प्रकृतौ [९]तदुपास्यत्वं ज्ञेयता ब्रह्मणि स्फुटा ।
[१०]तत्रादिमात्परादेव्यास्सपर्या शास्त्रचोदिता ॥ २ ॥
रूपनामात्मना तेन[११] पूजोपकरणं द्विधा ।
ते तावद्भवतः कौलसमयचारिणोः क्रमात् ॥ ३ ॥
रूपं पुनर्द्विधा जातं देहचक्रविभेदतः ।
[१२]तयोरपि द्विधाऽऽचारभेदोऽस्ति हि[१३]तयोस्तथा ॥ ४ ॥
कुण्डलिन्याख्यया देवी पिण्डाण्डे तु व्यवस्थिता ।
ब्रह्माण्डस्तत्प्रतीको[१४] हि श्रीचक्रमुभयोस्तथा ॥ ५ ॥
कुण्डलिन्यपि सा सेव्या नामरूपात्मना पथा ।
तस्या उपासनाध्वानष्षड्वर्णादिविभेदतः ॥ ६ ॥
तत्रादिमं नाम तावद् [१५]वर्णमन्त्रपदात्मकम् ।
रूपं पुनः कला-तत्त्व-भुवनाख्यानतस्त्रिधा ॥ ७ ॥
त्रिनाभिचक्रमित्ये[१६]तद्गतिमार्गः श्रुतीरितः ।
प्रस्ताराश्चैवमेव स्युः ते भू-कैलास-मेरवः ॥ ८ ॥
नामात्र मातृका ग्राह्या रूपं श्रीचक्रसंज्ञकम् ।
प्रस्तारनाम्नां सारूप्यं मातृका-चक्रयोरिह[१७] ॥ ९ ॥
प्रस्तारास्ते मातृकादेः[१८]नाम्नि रूपेऽपि[१९]तद्गतेः ।
स्याद् भूः मेरुश्च कैलासः वक्ष्यमाणविधानतः ॥१०॥

## अथ उक्तार्थविवरणम्—

मातृकामय इत्येको नित्या तादात्म्यतोऽपरः ।
मन्त्रतादात्म्यतोऽन्यश्च त्रिधा शाब्दो निरूपितः ॥११॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रूपतोऽपि च भूमेरुकैलासाख्यानतस्त्रिधा ।
तत्रादिर्भूतलाकारताम्रपत्रादिलेखनात् ॥१२॥
समवृत्तार्धरूपोऽन्यो दीर्घवृत्तार्धरूपवान् ।
उक्तार्थस्य समस्तस्य प्रमाणं श्रुतिरेव हि ॥१३॥
श्रीपदोद्दिष्टमखिलं ब्रह्माण्डं सचराचरम् ।
तस्मात्तदधिपो लोके ख्यातः श्रीपतिनामकः ॥१४॥
[२०]त्रिनाभिचक्रमित्यादिश्रुत्या तच्चक्रमीरितम् ।
[२१]श्रीचक्रराजनिलयेत्यादिस्मृत्या च तत्तथा ॥१५॥
तदेव तावच्छ्रीदेव्याः पूजायां तन्त्रचोदितम् ।
इत्येतदर्पितो देव्यै नाम्ना प्रस्तारभास्करः ॥१६॥

अथास्य विवृतिः–

सौन्दर्यलहर्यां "चतुष्षष्ट्या तन्त्रैः ( ३१ श्लो० ) इत्यादि-श्लोकस्य श्रीलोल्ललक्ष्मीधरपण्डितकृत-"लक्ष्मीधराख्य"-व्याख्यानुसारणी इयं विवृतिः । अत्राङ्गिभूताः षोडशनित्याः अष्टवर्गात्मकतया अष्टदल-पद्मदलेषु स्थिताः अष्टकोणचक्रे एकैकस्मिन् कोणे द्विकं द्विकं अन्तर्भूतम् । एताः एव नित्याः षोडशस्वरात्मकतया षोडशदलपद्मे स्थिताः । द्विदशारे अन्तर्भूताः । तासां मध्ये प्रथमं नित्याद्वयं त्रिकोणबिन्दुरूपेण स्थितम् । अवशिष्टाः तु चतुर्दशनित्याः मन्वस्रे अन्तर्भूताः । मेखलात्रयं वृत्तत्रयं भूपुरत्रयं बैन्दवत्रिकोणयोः अन्तर्भूते । एवं नित्यानां चक्रे अन्तर्भावः । इममेव अन्तर्भावं मेरुप्रस्तारमाहुः । अत्र नित्यानां मातृका-सम्बन्धित्वात्, मातृकायाः अकारादिवर्णात्मकत्वेन वर्णानां शब्दसंबन्धित्वेन च अयं नामप्रस्तारः एव ॥

अथ ताः एव नित्याः चक्रविद्यायाः चन्द्रकलास्वरूपायाः अङ्गभूताः सत्यः षोडशस्वरात्मिकाः भूत्वा पञ्चदशाक्षरमन्त्रगताः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकारादिभूतककार-विसर्गात्मकसकाराभ्यां संगृहीताः बैन्दवस्थानस्थाः । कादयः मावसानाः पाशाङ्कुशबीजयुक्ताः सन्तः अष्टारे दशकोणद्वये अन्तर्भूताः । शिष्टाः तु यकारादयः वर्णाः मन्वस्रे द्विरावृत्या अन्तर्भूताः । शिष्टवर्णचतुष्टयं शिवचक्रचतुष्टये अन्तर्भूतम् । इममेव कैलाशप्रस्तारमाहुः । एतस्य अपि मातृकामयत्वेन अयं च शाब्दापरनामधेयप्रस्तारः एव ॥

अथ भूप्रस्तारः–

नित्यानां द्विकं द्विकं वशिन्याद्यष्टके मेलयित्वा अष्टकोणेषु अन्तर्भाव्याः । अष्टवर्गाः तु (चतुश्चत्वारिंशद्वर्णाः) = अष्टवर्गाः च । अथ अष्टवशिन्याद्याः + षोडशनित्याः + द्वादशयोगिन्यः + चतस्रः चतस्रः कामाकर्षिण्यादयः आहत्य चतुश्चत्वारिंशद्देवताः । एतासु एकां सादाख्यां विहाय अवशिष्टत्रिचत्वारिंशद्देवताः त्रिचत्वारिंशत्कोणेषु (अष्टकोण + दशारद्वय + चतुर्दशार + त्रिकोणात्केषु) विभाव्य, सादाख्यां त्रिपुरसुन्दरीं बैन्दवाद् अधस्ताद् विभावयेत् । गन्धाकर्षिण्यादयः पुनः चतुर्द्वारेषु विभाव्याः । एवंविभावनां भूप्रस्तारमाहुः । एवमेव सुभगोदयादिषु नामप्रस्तारभेदानाहुः ॥

अथ रूपप्रस्तारानुदाहरिष्यामः—

बाह्यपूजोपयोगित्वेन श्रीचक्रस्य आकृतिविशेष-तादात्म्यापन्नरूपप्रस्तारः विविच्यते । यथा, बिन्द्वर्धचन्द्रादिनवनादान्तरालभूतदशाङ्गुलपरिमितचतुरश्रे ताम्रादिधातुमयपत्रे वा स्फाटिकादिशिलामयफलके वा अस्मदावासभूमेः तलसदृशे बिन्दुत्रिकोणादिनवयोन्यात्मकं श्रीचक्रं परिलेखयेत् । एतद् एव रूपप्रस्ताराङ्गभूतभूप्रस्तारः । अत्र नवनादान्तरालस्य दशाङ्गुलपरिमितत्वं पुनः "स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्" इति श्रुत्युपदिष्टं वेदितव्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ मेरुप्रस्तारः—

अस्मदावासभूतभूमेः एव सर्वक्रियाकलापाऽऽधारत्वेन अखिल-ब्रह्माण्डसृष्टेः श्रीपदवाच्यत्वेन तादृशश्रीदेव्युपासनाङ्गभूत-श्रीचक्रस्य ब्रह्माण्डाकृतिः एव ग्राह्या प्रतीकतया । अतः तदङ्भूत-भूगोलस्य अस्मदावासत्वेन तदाकृतिः एव ग्राह्या खलु तत्प्रतीको-पासनायाम् । अतः भूव्यासार्धोच्छ्रयं श्रीचक्रं कर्तव्यम् । तद् एव **मेरुप्रस्तरवाच्यं** भवति । एतद् अपि रूपप्रस्तारान्तर्भूतः एव ।

अथ कैलासप्रस्तारः—

भूगोलः तु स्वाकर्षकं रविं परितः परिभ्रमति इति विज्ञायते । "आयं गौः पृश्निरक्रमीद्" इत्यादिश्रुत्या तादृश-परिभ्रमणं त्रिनाभिचक्रात्मकस्वकक्षायां एकवार्षिककालेन एकवारम् । तदा तस्य उच्च-नीचगतिसंभवः च । स यदा परमोच्चस्थानं गच्छति तदा तस्य तदाकर्षकस्य च अन्तरं बृहदक्षाधिकभागसंज्ञितं भवति । तादृशबृहदक्षभागसम्मितोच्चं श्रीचक्रं कैलासप्रस्तारवद् इति ज्ञेयम् । एवं त्रिधा भवति रूपप्रस्तारः । अथ अर्धमेर्वाकृतिः इति मेरुप्रस्तारः तु उक्तमेरुप्रस्तारे एव अन्तर्भावः । इति सर्वम् अनवद्यम् ।

इति श्रीपरिपूर्णप्रकाशनानन्द[नाथ]भारतीमहायतिकृतिषु श्रीदेव्युपायनीकृतः अयं प्रस्तारभास्करः ।

## अथ प्रस्तारभास्करगतव्याख्या [फुटनोट्स]

१. तत् = तस्मात्कारणात् ।

२. आत्मसान्निध्यवैभवात्—"श्रीशिवाशिवशक्त्यैक्यरूपिणी । ललिताम्बिका" इति श्रीललितासहस्रनामोक्तेः ललितापर-नाम्न्याः मूलप्रकृतेः आत्मसान्निध्यं नित्यं प्रतिभाति । अतः एव "कामेश्वरमुखालोककल्पितश्रीगणेश्वरा:" इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च । जीवप्रतिनिधि-श्री-गणनाथसृष्टामात्मरूप-महाकामेश्वर-मुखाऽऽलोकनं निरूपितम् ।

३. जीवभूता:—"जीवभूतां महाबाहो प्रकृतिं विद्धि मे पराम्" (गीता ७.५) इति भगवद्गीतोक्तिः अपि इमां ललिताऽपर-नाम्नीं प्रकृतिमेव जीवप्रकृतिः इति कथयति इति भावः ।

४-५. ते = नाम-रूपं च ॥

६. पक्षान्तरे = सौरादिमतनिरूपणपक्षे ।

७. सौरशाक्तादिभेदतः = सौर-शाक्त-गाणपत्य-वैष्णव-शैव-ऐन्दवः (जैन) इति षड्विधभेदतः ।

८. प्रकृतौ = प्रकृतिविषये प्राकृतोपासनायाम् इति यावत् ।

९. तत् = तस्मात् कारणात् क्रियासंबन्धित्वाद् इति यावत् ।

१०. तत्र = उपास्यत्व-ज्ञेयत्वयोः ।

११. तेन = पूर्वोक्तकारणेन क्रियासम्बन्धित्वरूपेण इति यावत् ।

१२. तयोः = देहचक्रयोः अपि ।

१३. तयोः = कौलाचार-समयाचारवतोः ।

१४. तत्प्रतीकः = पिण्डाण्डप्रतीकः ।

१५. "वर्ण-मन्त्र-पदात्मकम्"—अयं क्रमः तु विरूपाक्षपञ्चा-शिकापाठः । अन्यत्र "वर्णः पदं मन्त्रः" इति । किं च अस्मिन् विषये कुलार्णवतन्त्रे तावत् षडागमा निरूपिताः —"शैववैष्णवदौर्गार्कगाणपत्येन्दुसंभवैः" इति (इन्दुसंभवः = जैनदर्शनम्) ।

१६. इत्येयतद्गतिमार्गः = रूपप्रतीकभूतः एतत्सकलभुवन-गमनमार्गः ।

१७. इह = प्रस्तारप्रकरणे "मातृका-श्रीचक्रयोरुभयोः" प्रस्तार-नामानि पुनः, भूकैलाशमेरवः इति सरूपाणि एव । न तथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अध्वप्रकरणे "इत्यर्थं द्योतयत्यत्रेह" इति पदम् ।

१८. आदेः = अत्रादिपदेन श्रीदेवी-चरण-मन्त्र-नित्याः अपि गृह्यन्ते ।

१९. तद्गतेः = रूपगतिवशाद् इत्यर्थः । तथा च श्रुतिः "त्रिनाभिचक्रम्" इत्यादि ।

२०. त्रिनाभिचक्रं—"त्रिनाभिचक्रमजरमनर्वं येनेमा विश्वा भुवनानि तस्थुः" इति श्रुत्या ।

२१. श्रीचक्रराजनिलया—"श्रीचक्रराजनिलया श्रीमत्त्रिपुरसुन्दरी" (श्रीललितासहस्रनाम) इति स्मृत्या इति भावः ।।

इति प्रस्तारभास्करगतव्याख्याटिप्पणयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# भावबोधनीटीकाकर्त्तुः संक्षिप्तचरितम्

एते तावद् राज्ञी( "राणी" )त्युपनामक-नृसिंहाग्निचिद्यज्वनां पुत्ररत्नम्। एतन्नाम वेङ्कटाचलपति-महाग्निचिद् इति। जन्मभूमिस्तु आन्ध्रप्रदेशीय-पूर्वगोदावरीमण्डलस्थ-कोत्तपेट-तालूकान्तर्गत-वाडपालेम इति नाम्ना प्रसिद्धो ग्रामः। जन्मकालः क्रीस्तु-सं० १८९० सेप्टेम्बर-मासे ११ दिवसो गुरुवासरः [एतत्तुल्ये विकृतिवत्सरेऽधिकभाद्रपद-कृष्णपक्ष-द्वादशी]।

पाण्डित्यम्—वेदवेदाङ्ग-मन्त्रशास्त्र-ज्योतिःशास्त्र-आयुर्वेदशास्त्र-पारीणाः, मन्त्र-शास्त्रीय-पूर्णदीक्षा-दीक्षिताः, श्रौतकर्मसु सर्वपृष्ठ-चयन-बृहस्पतिसवान्त-क्रतुकर्त्तारश्च। अपि चैते ग्रन्थकर्त्तारश्च। एतत्कृतग्रन्थाः—विमर्शामृतम्, हंसकिरणावलिः, वेदान्तप्रासादीयभाष्यमुक्ताफलम्, आयुर्विज्ञानम्, पूर्णध्वजः। किं च, स्वपितृचरणकृतनृसिंहसांख्यदर्शनस्य वेदान्तग्रन्थस्य सभाष्यस्य चक्रवाकीति नाम्नीम् आन्ध्रटीकां चक्रुः।

एतदुपाधिः कृष्णामण्डलान्तर्गत-विजयवाडनगरे श्रीवेङ्कटेश्वरायुर्वेदकला-शालायां क्री० सं० १९६२ पर्यन्तम् आयुर्वेदाध्यापकाः। एतदनन्तरं क्री० सं० १९६२ वत्सरे अद्यतनकाले गुण्टूरुमण्डलस्थगुण्टूरुनगरस्थ-श्रीशृङ्गेरी-श्रीविरूपाक्ष - श्रीपीठाधीश्वर - श्रीसदाशिवानन्द - भारती - महास्वामिभ्यो यत्याश्रमं स्वीकृतवन्तः। [मोक्षकालः क्री० २।३।८२]।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## पाठभेदाः

संपूर्णानन्दसंस्कृतविश्वविद्यालयस्थ-श्रीसरस्वतीभवनग्रन्थालये समुपलब्धस्य देवनागरीपाण्डुलिपिद्वयस्य मूलपाठव्यतिरिक्ताः कतिपयपाठभेदा अधोलिखिताः। पाण्डुलिपिद्वयस्य परिचयः—प्रथमा **क.** इति संज्ञिता, यस्याः क्रमसंख्या २१९२१। पत्राणि १–५३; पत्राकारश्च ५.७ × ३.८"। एषा सम्पूर्णा। आदौ "अथ श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगौडपादाचार्यविरचिता सुभगोदयस्तुतिः"। अन्ते पुष्पिकायां च "इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगौडपादाचार्यविरचिता सुभगोदयस्तुतिः ॥"

अपरा च **ख.** इति संज्ञिता, यस्याः क्रमसंख्या २१९१९। पत्राणि १–२९; पत्राकारश्च ५ × ३.४"। संपूर्णा। आदौ "अथ श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीगौडपादाचार्यविरचिता सुभगोदयस्तुतिप्रारम्भः ॥" अन्ते पुष्पिकायां च "इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीगौडपादाचार्यविरचिता सुभगोदयस्तुतिः ॥ समाप्ता ॥ नि. ल. घं. (? पं.) ता. २८।११।३७ रवौ ॥"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| श्लोकः | पादः | मूलपाठः | पाठभेदः |
|---|---|---|---|
| १ | २ | °लहरीमैन्दव° | °लहरीं बैन्दव° [क. ख.] |
| | ३ | °सरणीकल्पित° | °सरणिं कल्पित° [क. ख.] |
| २ | २ | °त्ताक्षः | °त्ताक्षी [क. ख.] |
| ३ | १ | °जुषो | °जुषे [क. ख.] |
| ६ | २ | महाकाल° | महानील° [क. ख.] |
| ८ | २ | षट्त्रिंशद्दश° | षट्त्रिंशच्छत° [ख.] |
| ९ | ४ | महाकौलै° | महाकाल° [क.] |
| १० | २ | | तव स्वाधिष्ठानं भगवति दशारं मणिपुरम् [क. ख.] |
| ११ | २ | च भुवनम् | त्रिभुवनम् [क. ख.] |
| १२ | १ | तयोर्नादविभवे | च नादादिविभवे [क. ख.] |
| १४ | ४ | | लसत्पाशं हस्तैरुदित° [क. ख.] |
| १६ | १ | फणिपाशं | घृणिपाशं [ख.] |
| | २ | जपस्रक्शुकवरौ | जपस्रक्क्षुरवरम् [क. ख.] |
| १७ | २ | भूगेहादपि | भूवेष्मादपि [क. ख.] |
| | ४ | °वाम्ब शरणम् | °वाम्भकरणम् [क. ख.] |
| १९ | १ | परो मारमदन- | मरो मारमदनः [क. ख.] |
| | २ | °श्चेति | °श्चैते [क. ख.] |
| २१ | ३ | °मन्वक्कषषुगं | °मञ्चत्कषयुगं [क. ख.] |
| २२ | १ | | विदेहो निर्ऋत्यास्सुत इह ऋषिर्यस्स च [क. ख.] |
| | २ | तैत्तिर्यकऋचि | तैत्तीरियऋचि [क. ख.] |
| २३ | २ | शेषो यत इह | शेषा इह खलु [क. ख.] |
| | ३ | च सुभगे | स च भगे [क. ख.] |
| २५ | ३ | पञ्चदशधा | पञ्चदशतो [क. ख.] |
| २७ | १ | हलो | हरो [क. ख.] |
| २८ | १ | वदन्त्येके | भवन्त्येके [क. ख.] |
| २९ | २ | कमलेऽस्मिन् | कुमतेऽस्मिन् [क. ख.] |
| | ४ | हिमानी° | भवानी° [क. ख.] |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| श्लोकः | पादः | मूलपाठः | पाठभेदः |
|---|---|---|---|
| ३१ | ३ | रविरुपरि | रतिरुपरि [क. ख.] |
| | ४ | हरिहर° | हरहरि° [क. ख.] |
| ३२ | २ | °माप्लावित° | °माह्लादित° [क. ख.) |
| ३४ | ३ | विद्युन्नियुत° | विद्वन् नियत° [क. ख.] |
| | ४ | विद्युल्लेखा | विद्वल्लेखा [क. ख.] |
| ३६ | २ | षड्विंशी | षट्त्रिंशा [क. ख.] |
| ३७ | १ | क्षितौ वह्नि° | महावह्नि° [क. ख.] |
| | २ | कलाश्रे | कलारे [क. ख.] |
| ३८ | २ | यदा | सदा [क. ख.] |
| ४० | २ | स्वविषयाः | सविषयाः [क. ख.] |
| | ३ | | यदा वर्गा वर्णप्रचुरतरमाया-भिरभवन् [क. ख.] |
| ४४ | ३ | वामादिप्रभृति° | वामादिप्रकृति° [क. ख.] |
| ४५ | ३ | सृष्टैर्वारि° | सृष्टे वारि° [क. ख.] |
| | ४ | °र्द्विधा लोके | °र्विभालोके [क. ख.] |
| ४८ | २ | °भूत्स्वान्त° | °भून्नेत्र° [क. ख.] |
| ५१ | २ | चैतत्स° | चेतः स° [क. ख.] |
| ५२ | १ | अतोऽस्याः संसिद्धौ | अतस्ते संसिद्धा [क. ख.] |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only